# The AbhijnAnashAkuntalam of KAlidAsa

# અભિજ્ઞાનશાકુન્તલમ્

## Document Information

Text title : abhijnaana shaakuntala

File name : shaakuntala.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : Kalidas

Transliterated by : Professor Muneo Tokunaga July 26, 1999

Proofread by : Shrirang Nene snene at lds.com

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# અભિજ્ઞાનશાકુન્તલમ્

અથ અભિજ્ઞાનશાકુંતલમ્ ।

પ્રથમોઽઙ્કઃ ।

યા સૃષ્ટિઃ સ્રષ્ટુરાદ્યા વહતિ વિધિહુતં યા હવિર્યા ચ હોત્રી
યે દ્વે કાલં વિધત્તઃ શ્રુતિવિષયગુણા યા સ્થિતા વ્યાપ્ય વિશ્વમ્ ।
યાં આહુઃ સર્વબીજપ્રકૃતિરિતિ યયા પ્રાણિનઃ પ્રાણવન્તઃ
પ્રત્યક્ષાભિઃ પ્રપન્નસ્તનુભિરવતુ વસ્તાભિરષ્ટાભિરીશઃ ॥ ૧॥

(નાન્દ્યન્તે )
સૂત્રધારઃ – ( નેપથ્યાભિમુખમવલોક્ય )
આર્યે યદિ નેપથ્યવિધાનમવસિ અમિતસ્તાવદાગમ્યતામ્ ।
( પ્રવિશ્ય )
નટી - આર્યપુત્ર ઇયમસ્મિ ।
સૂત્રધારઃ – આર્ય અભિરૂપભૂયિષ્ઠા પરિષદિયમ્ । અદ્ય ખલુ
કાલિદાસગ્રથિતવસ્તુના નવેનાભિજ્ઞાનશકુંતલાખ્યેન
નાટકેનોપસ્થાતવ્યમસ્માભિઃ । તત્પ્રતિપાત્રમાધીયતાં યત્નઃ ।
નટી – સુવિહિતપ્રયોગતયાયાર્યસ્ય ન કિમપિ પરિહાસ્યતે ।
સૂત્રધારઃ – આર્યે કથયામિ તે ભૂતાર્થમ્ ।
આ પરિતોષાદ્વિદુષાં ન સાધુ મન્યે પ્રયોગવિજ્ઞાનમ્ ।
બલવદપિ શિક્ષિતાનામાત્મન્યપ્રત્યયં ચેતઃ ॥ ૨॥

નટી – આર્ય એવમેતત્ । અનન્તરકરણીયમાર્ય આજ્ઞાપયતુ ।
સૂત્રધારઃ – કિમન્યદસ્યાઃ પરિષદઃ શ્રુતિપ્રસાદનતઃ । તદિમમેવ
તાવદચિરપ્રવૃત્તમુપભોગક્ષમં ગ્રીષ્મસમયમધિકૃત્ય ગીયતામ્ ।
સમ્પ્રતિ હિ -
સુભગસલિલાવગાહાઃ પાટલસંસર્ગસુરભિવનવાતાઃ ।
પ્રચ્છાયસુલભનિદ્રા દિવસાઃ પરિણામરમણીયાઃ ॥ ૩॥

નટી – તથા ।

( ઇતિ ગાયતિ )

ઈષદીષચ્ચુમ્બિતાનિ ભ્રમરૈઃ સુકુમારકેસરશિખાનિ ।
અવતંસયન્તિ દમમાનાઃ પ્રમદાઃ શિરીષકુસુમાનિ ॥ ૪॥

સૂત્રધારઃ – આર્યે સાધુ ગીતમ્ । અહો
રાગબદ્ધચિત્તવૃત્તિરાલિખિત ઇવ સર્વતો રઙ્ગઃ ।
તદિદાનીં કતમત્પ્રકરણમાશ્રિત્યૈનમારાધયામઃ ।
નટી – નન્વાર્યમિશ્રૈઃ પ્રથમમેવાજ્ઞપ્તમભિજ્ઞાનશકુંતલં
નામાપૂર્વં નાટકં પ્રયોગે અધિક્રિયતામિતિ ।
સૂત્રધારઃ – આર્યે સમ્યગનુબોધિતોઽસ્મિ । અસ્મિન્ક્ષણે વિસ્મૃતં ખલુ
મયા તત્ । કુતઃ ।
તવાસ્મિ ગીતરાગેણ હારિણા પ્રસભં હૃતઃ ।
એષ રાજેવ દુષ્યન્તઃ સારઙ્ગેણતિરંહસા ॥ ૫॥

( ઇતિ નિષ્ક્રાન્તૌ )

( પ્રસ્તાવના )

( તતઃ પ્રવિશતિ મૃગાનુસારી સશરચાપહસ્તો રાજા રથેન સૂતશ્ચ
)

સૂતઃ – ( રાજાનં મૃગં ચાવલોક્ય ) આયુષ્મન્ ।
કૃષ્ણસારે દદશ્ચક્ષુસ્ત્વયિ ચાધિજ્યકાર્મુકે ।
મૃગાનુસારિણં સાક્ષાત્પશ્યામીવ પિનાકિનમ્ ॥ ૬॥

રાજાઃ – સૂત દૂરમમુના સારઙ્ગેણ વયમાકૃષ્ટાઃ । અયં
પુનરિદાનીમપિ ગ્રીવાભઙ્ગભિરામં મુહુરનુપતતિ સ્યન્દને દત્તદૃષ્ટિઃ
પશ્ચાર્ધેન પ્રવિષ્ટઃ શરપતનભયાદ્ભૂયસા પૂર્વકાયમ્ ।
દર્ભૈરર્ધાવલીઢૈઃ શ્રમવિવૃતમુખભ્રંશિભિઃ કીર્ણવર્ત્મા
પશ્યોદગ્રપ્લુતત્વાદ્વિયતિ બહુતરં સ્તોકમુર્વ્યામ્ પ્રયાતિ ॥ ૭॥

( સવિસ્મયમ્ )

તદેષ કથમનુપતત એવ મે પ્રયત્નપ્રેક્ષણીયઃ સંવૃત્તઃ ।
સૂતઃ – આયુષ્મન્ ઉદ્ઘાતિની ભૂમિરિતિ મયા રશ્મિસંયમનાદ્રથસ્ય
મન્દીકૃતો વેગઃ । તેન મૃગ એષ વિપ્રકૃષ્ટાન્તરઃ સંવૃત્તઃ ।
સમ્પ્રતિ સમદેશવર્તિનસ્તે ન દુરાસદો ભવિષ્યતિ ।

રાજાઃ – તેન હિ મુચ્યન્તામભીષવઃ ।
સૂતઃ – યદાજ્ઞાપયત્યાયુષ્માન્ ।
( રથવેગં નિરૂપ્ય )
આયુષ્મન્પશ્ય પશ્ય ।
મુક્તેષુ રશ્મિષુ નિરાયતપૂર્વકાયા
નિષ્કમ્પચામરશિખા નિભૃતોર્ધ્વકર્ણાઃ ।
આત્મોદ્ધતૈરપિ રજોભિરલઙ્ઘનીયા
ધાવન્ત્યમી મૃગજવાક્ષમયેવ રથ્યાઃ ॥ ૮॥

રાજાઃ – સત્યમ્ । અતીત્ય હરિતો હરીંશ્ચ વર્તન્તે વાજિનઃ । તથા
હિ ।
યદાલોકે સૂક્ષ્મં વ્રજતિ સહસા તદ્વિપુલતાં
યદર્ધે વિચ્છિન્નં ભવતિ કૃતસંધાનમિવ તત્ ।
પ્રકૃત્યા યદ્વક્ત્રં તદપિ સમરેખં નયનયોર્ન
મે દૂરે કિઞ્ચિત્ક્ષણમપિ ન પાર્શ્વે રથજવાત્ ॥ ૯॥

સૂત પશ્યૈનં વ્યાપદ્યમાનમ્ ।
( ઇતિ શરસંધાનં નાટયતિ )
( નેપથ્યે )
ભો ભો રાજન્ આશ્રમમૃગોઽયં ન હન્તવ્યો ન હન્તવ્યઃ ।
સૂતઃ – ( આકર્ણ્યાવલોક્ય ચ )
આયુષ્મનસ્ય ખલુ તે બાણપાતવર્તિનઃ કૃષ્ટસારસ્યાન્તરે તપસ્વિન
ઉપસ્થિતાઃ ।
રાજાઃ – ( સસમ્ભ્રમમ્ )
તેન હિ પ્રગૃહ્યન્તાં વાજિનઃ ।
સૂતઃ – તથા ।
( ઇતિ રથં સ્થાપયતિ )
(તતઃ પ્રવિશત્યાત્મનાતૃતીયો વૈખાનસઃ )
વૈખાનસઃ – ( હસ્તમુદ્યમ્ય )
રાજન્ આશ્રમમૃગોઽયં ન હન્તવ્યો ન હન્તવ્યઃ ।
ન ખલુ ન ખલુ બાણઃ સંનિપાત્યોઽયમસ્મિન્મૃદુનિ
મૃગશરીરે પુષ્પરાશાવિવાગ્નિઃ ।
ક્વ બત હરિણકાનાં જીવિતં ચાતિલોલં ક્વ ચ

નિશિતનિપાતા વજ્રસારાઃ શરાસ્તે ॥ ૧૦॥

તત્સાધુકૃતસંધાનં પ્રતિસંહર સાયકમ્ ।
આર્તત્રાણાય વઃ શસ્ત્રં ન પ્રહર્તુમનાગસિ ॥ ૧૧॥

રાજાઃ – એષ પ્રતિસમ્હૃતઃ ।
( ઇતિ યથોક્તં કરોતિ )
વૈખાનસઃ – સદૃશમેતત્ પુરુવંશપ્રદીપસ્ય ભવતઃ ।
જન્મ યસ્ય પુરોર્વંશે યુક્તરૂપમિદં તવ ।
પુત્રમેવઙ્ગુણોપેતં ચક્રવર્તિનમાપ્નુહિ ॥ ૧૨॥

ઇતરૌ – ( બાહૂ ઉદ્યમ્ય ) સર્વથા ચક્રવર્તિનં પુત્રમાપ્નુહિ ।
રાજાઃ – ( સપ્રણામમ્ )
પ્રતિગૃહીતં બ્રાહ્મણવચનમ્ ।
વૈખાનસઃ – રાજન્ સમિદાહરણાય પ્રસ્થિતા વયમ્ । એષ ખલુ
કણ્વસ્ય કુલપતેરનુમાલિનીતીરમાશ્રમો દૃશ્યતે । ન
ચેદન્યકાર્યાતિપાતઃ પ્રવિશ્ય પ્રતિગૃહ્યતામાતિથેયઃ સત્કારઃ । અપિ
ચ ।
રમ્યાસ્તપોધનાનાં પ્રતિહતવિઘ્નાઃ ક્રિયાઃ સમવલોક્ય ।
જ્ઞાસ્યસિ કિયદ્ભુજો મે રક્ષતિ મૌર્વીકિણાઙ્ક ઇતિ ॥ ૧૩॥

રાજાઃ – અપિ સંનિહિતોઽત્ર કુલપતિઃ ।
વૈખાનસઃ – ઇદાનીમેવ દુહિતરં શકુંતલામતિથિસત્કારાય
નિયુજ્ય દૈવં અસ્યાઃ પ્રતિકૂલં શમયિતું સોમતીર્થં ગતઃ ।
રાજાઃ – ભવતુ । તામેવ પશ્યામિ । સા ખલુ વિદિતભક્તિં માં
મહર્ષેઃ કરિષ્યતિ ।
વૈખાનસઃ – સાધયામસ્તાવત્ ।
( ઇતિ સશિષ્યો નિષ્ક્રાન્તઃ )
રાજાઃ – સૂત ચોદયાશ્વાન્ પુણ્યાશ્રમદર્શનેન તાવદાત્માનં
પુનીમહે ।
સૂતઃ – યદાજ્ઞાપયત્યાયુષ્મન્ ।
( ઇતિ ભૂયો રથવેગં નિરૂપયતિ )
રાજાઃ – ( સમન્તાદવલોક્ય )
સૂત અકથિતોઽપિ જ્ઞાયત એવ યથાયમાશ્રમાભોગસ્તપોવનસ્યેતિ ।

સૂતઃ – કથમિવ ।

રાજાઃ – કિં ન પશ્યતિ ભવાન્ । ઇહ હિ

નીવારાઃ શુકગર્ભકોટરમુખભ્રષ્ટાસ્તરૂણામધઃ
પ્રસ્નિગ્ધાઃ ક્વચિદિઙ્ગુદીફલભિદઃ સૂચ્યન્ત એવોપલાઃ ।
વિશ્વાસોપગમાદભિન્નગતયઃ શબ્દં સહન્તે
મૃગાસ્તોયાધારપથાશ્ચ વલ્કલશિખાનિષ્યન્દરેખાઙ્કિતાઃ ॥ ૧૪॥

<કુલ્યામ્ભોભિઃ પવનચપલૈઃ શાખિનો ધૌતમૂલા
<ભિન્નો રાગઃ કિસલયરુચામાજ્યધૂમોદ્ગમેન ।
<એતે ચાર્વાગુપવનભુવિ ચ્છિન્નદર્ભાન્કુરાયાં
<નષ્ટાંશકા હરિણશિશવો મન્દમન્દં ચરન્તિ ।

સૂતઃ – સર્વમુપપન્નમ્ ।

રાજાઃ – ( સ્તોકમન્તરં ગત્વા )

તપોવનનિવાસિનામુપરોધો મા ભૂત્ । એતાવત્યેવ રથં સ્થાપય
યાવદવતરામિ ।

સૂતઃ – ધૃતાઃ પ્રગ્રહાઃ । અવતરત્વાયુષ્માન્ ।

રાજાઃ – ( અવતીર્ય )

સૂત વિનીતવેષેણ પ્રવેષ્ટવ્યાનિ તપોવનાનિ નામ । ઇદં
તાવદ્ગૃહ્યતામ્ ।

( ઇતિ સૂતસ્યાભરણાનિ ધનુશ્ચોપનીયાર્પયતિ )

સૂત યાવદાશ્રમવાસિનઃ પ્રત્યવેક્ષ્યાહમુપાવર્તે
તાવદાર્દ્રપૃષ્ઠાઃ ક્રિયન્તાં વાજિનઃ ।

સૂતઃ – તથા ।

( ઇતિ નિષ્ક્રાન્તઃ )

રાજાઃ – ( પરિક્રમ્યાવલોક્ય ચ )

ઇદમાશ્રમદ્વારમ્ । યાવત્પ્રવિશામિ ।

( પ્રવિશ્ય । નિમિત્તં સૂચયન્ )

શાન્તમિદમાશ્રમપદં સ્ફુરતિ ચ બાહુઃ કુતઃ ફલમિહસ્ય ।
અથવા ભવિતવ્યાનાં દ્વારાણિ ભવન્તિ સર્વત્ર ॥ ૧૫॥

( નેપથ્યે )

ઇત ઇતઃ સખ્યૌ ।

રાજાઃ – ( કર્ણં દત્ત્વા )

અયે દક્ષિણેન વૃક્ષવાટિકામાલાપ ઇવ શ્રૂયતે । યાવદત્ર ગચ્છામિ ।

( પરિક્રમ્યાવલોક્ય ચ )
અયે એતાસ્તપસ્વિકન્યકાઃ સ્વપ્રમાણાનુરૂપૈઃ સેચનઘટૈર્બાલપાદપેભ્યઃ
પયો દાતુઇત એવાભિવર્તન્તે ।
( નિપુણં નિરૂપ્ય )
અહો મધુરમાસાં દર્શનમ્ ।
શુદ્ધાન્તદુર્લભમિદં વપુરાશ્રમવાસિનો યદિ જનસ્ય ।
દૂરીકૃતાઃ ખલુ ગુણૈરુદ્યાનલતા વનલતાભિઃ ॥ ૧૬॥

યાવદિમાં છાયામાશ્રિત્ય પ્રતિપાલયામિ ।
( ઇતિ વિલોકયન્ સ્થિતઃ )
( તતઃ પ્રવિશ્યતિ યથોક્તવ્યાપારા સહ સખીભ્યાં શકુંતલ )
શકુંતલા – ઇત ઇતઃ સખ્યૌ ।
અનસૂયા – હલા શકુન્તલે ત્વત્તોઽપિ તાતકાશ્યપસ્યાશ્રમવૃક્ષકાઃ
પ્રિયતરા ઇતિ તર્કયામિ । યેન નવમાલિકાકુસુમપેલવાપિ
ત્વમેતેષામાલવાલપૂરણે નિયુક્તા ।
શકુંતલા – ન કેવલં તાતનિયોગ એવ । અસ્તિ મે સોદરસ્નેહોઽપ્યેતેષુ ।
( ઇતિ વૃક્ષસેચનં રૂપયતિ )
રાજાઃ – કથમિયં સા કણ્વદુહિતા । અસાધુદર્શી ખલુ
તત્રભવાન્કાશ્યપો ય ઇમામાશ્રમધર્મે નિયુઙ્ક્તે ।
ઇદં કિલાવ્યાજમનોહરં વપુસ્તપઃક્ષમં સાધયિતું ય ઇચ્છતિ ।
ધ્રુવં સ નીલોત્પલપત્રધારયા શમીલતાં છેતુમૃષિર્વ્યવસ્યતિ ॥
૧૭ ॥
ભવતુ । પાદપાન્તર્હિત એવ વિશ્રબ્ધં તાવદેનાં પશ્યામિ ।
( ઇતિ તથા કરોતિ )
શકુંતલા – સખિ અનસૂયે અતિપિનદ્ધેન વલ્કલેન પ્રિયંવદયા
નિયન્ત્રિતાઽસ્મિ । શિથિલય તાવદેતત્ ।
અનસૂયા – તથા ।
( ઇતિ શિથિલયતિ )
પ્રિયંવદા – ( સહાસમ્ )
અત્ર પયોધરવિસ્તારયિતૃ આત્મનો યૌવનં ઉપાલભસ્વ । માં કિં
ઉપાલભસે ।

રાજાઃ – કામમનનુરૂપમસ્ય વપુષો વલ્કલં ન
પુનરલંકારશ્રિયં ન પુષ્યતિ । કુતઃ ।
સરસિજમનુવિદ્ધં શૈવલેનાપિ રમ્યં
મલિનમપિ હિમાંશોર્લક્ષ્મ લક્ષ્મીં તનોતિ ।
ઇયમધિકમનોજ્ઞા વલ્કલેનાપિ તન્વી
કિમિવ હિ મધુરાણાં મણ્ડનં નાકૃતીનામ્ ॥ ૧૮॥

શકુંતલા – ( અગ્રતોઽવલોક્ય )
એષ વાતીરિતપલ્લવાઙ્ગુલીભિસ્ત્વરયતીવ માં કેસરવૃક્ષકઃ ।
યાવદેનં સમ્ભાવયામિ ।
( ઇતિ પરિક્રામતિ )
પ્રિયંવદા – હલા શકુન્તલે અત્રૈવ તાવન્મુહૂર્તં તિષ્ઠ
યાવત્વયોપગતયા લતાસનાથ ઇવાયં કેસરવૃક્ષકઃ પ્રતિભાતિ ।
શકુંતલા – અતઃ ખલુ પ્રિયંવદાસિ ત્વમ્ ।
રાજાઃ – પ્રિયમપિ તથ્યમાહ શકુંતલાં પ્રિયંવદા । અસ્યાઃ ખલુ
અધરઃ કિસલયરાગઃ કોમલવિટપાનુકારિણૌ બાહૂ ।
કુસુમમિવ લોભનીયં યૌવનમઙ્ગેષુ સંનદ્ધમ્ ॥ ૧૯॥

અનસૂયા – હલા શકુન્તલે ઇયં સ્વયમ્વરવધૂઃ સહકારસ્ય ત્વયા
કૃતનામધેયા વનજ્યોત્સ્નેતિ નવમાલિકા ।
એનાં વિસ્મૃતાઽસિ ।
શકુંતલા – તદાત્માનમપિ વિસ્મરિષ્યામિ ।
( લતામુપેત્યાવલોક્ય ચ )
હલા રમણીયે ખલુ કાલ એતસ્ય લતાપાદપમિથુનસ્ય વ્યતિકરઃ
સંવૃત્તઃ । નવકુસુમયૌવના વનજ્યોત્સ્ના સ્નિગ્ધપલ્લવતયોપભોગક્ષમઃ
સહકારઃ ।
( ઇતિ પશ્યન્તી તિષ્ઠતિ )
પ્રિયંવદા – અનસૂયે જાનાસિ કિં શકુંતલા વનજ્યોત્સ્નામતિમાત્રં
પશ્યતીતિ ।
અનસૂયા – ન ખલુ વિભાવયામિ । કથય ।
પ્રિયંવદા – યથા વનજ્યોત્સ્નાનુરૂપેણ પાદપેન સંગતા અપિ
નામૈવમહમપ્યાત્મનોનુરૂપં વરં લભેયેતિ ।
શકુંતલા – એષ નૂનં તવાત્મગતો મનોરથઃ ।

( ઇતિ કલશમાવર્જયતિ )

રાજાઃ – અપિ નામ કુલપતેરિયમસવર્ણક્ષેત્રસમ્ભવા સ્યાત્ । અથવા
કૃતં સંદેહેન ।

અસંશયં ક્ષત્રપરિગ્રહક્ષમા યદાર્યમસ્યામભિલાષિ મે મનઃ ।
સતાં હિ સંદેહપદેષુ વસ્તુષુ પ્રમાણમન્તઃકરણ પ્રવૃત્તયઃ ॥ ૨૦॥

તથાપિ તત્ત્વત એનામુપલસ્યે ।

શકુંતલા – ( સસમ્ભ્રમમ્ )
અમ્ભો । સલિલસેકસમ્ભ્રમોદ્ગતો નવમાલિકામુજ્ઝિત્વા વદનં મે
મધુકરોભિવર્તતે ।

( ઇતિ ભ્રમરબાધાં રૂપયતિ )

રાજાઃ – ( સસ્પૃહમ્ )

ચલપાઙ્ગાં દૃષ્ટિં સ્પૃશસિ બહુશો વેપથુમતીં
રહસ્યાખ્યાયીવ સ્વનસિ મૃદુ કર્ણાન્તિકચરઃ ।
કરૌ વ્યાધુન્વત્યાઃ પિબસિ રતિસર્વસ્વમધરમ્
વયં તત્ત્વાન્વેષાન્મધુકર હતાસ્ત્વં ખલુ કૃતી ॥ ૨૧॥

શકુંતલા – ન એષ ધૃષ્ટો વિરમતિ । અન્યતો ગમિષ્યામિ ।
કથમિતોઽપ્યાગચ્છતિ । હલા પરિત્રાયેથાં મામનેન દુર્વિનીતેન
મધુકરેણાભિભૂયમાનામ્ ।

ઉભે – ( સસ્મિતમ્ ) કે આવાં પરિત્રાતુમ્ । દુષ્યંતમાક્રન્દ ।
રાજરક્ષિતવ્યાનિ તપોવનાનિ નામ ।

રાજાઃ – અવસરોઽયમાત્માનં પ્રકાશયિતુમ્ । ન ભેતવ્યં ન
ભેતવ્યમ્ -।

( ઇત્યર્ધોક્તે સ્વગતમ્ )

રાજભાવસ્ત્વભિજ્ઞાતો ભવેત્ । ભવતુ એવં તાવદભિધાસ્યે ।

શકુંતલા – ( પદાન્તરે સ્થિત્વા । સદૃષ્ટિક્ષેપમ્ )
કથમિતોઽપિ મામનુસરતિ ।

રાજાઃ – ( સત્વરમુપસૃત્ય )
આઃ

કઃ પૌરવે વસુમતીં શાસતિ શાસિતરિ દુર્વિનીતાનામ્
અયમાચરત્યવિનયં મુગ્ધાસુ તપસ્વિકન્યાસુ ॥ ૨૨॥

( સર્વા રાજાનં દૃષ્ટા કિંચિદિવ સમ્ભ્રાન્તાઃ )

અનસૂયા – આર્ય ન ખલુ કિમપ્યત્યાહિતમ્ । ઇયં નૌ પ્રિયસખી
મધુકરેણાભિભૂયમાના કાતરીભૂતા ।
( ઇતિ શકુંતલાં દર્શયતિ )
રાજાઃ – ( શકુંતલાભિમુખો ભૂત્વા )
અપિ તપો વર્ધતે ।
( શકુંતલા સાધ્વસાદવચના તિષ્ઠતિ )
અનસૂયા – ઇદાનીમતિથિવિશેષલાભેન । હલા શકુન્તલે
ગચ્છોટજમ્ । ફલમિશ્રમર્ઘમુપહર । ઇદં પાદોદકં ભવિષ્યતિ।
રાજાઃ – ભવતીનાં સૂનૃતયૈવ ગિરાકૃતમાતિથ્યમ્ ।
પ્રિયંવદા – તેન હ્યસ્યાં પ્રછાયશીતલાયાં સપ્તપર્ણવેદિકાયાં
મુહૂર્તમુપવિશ્ય પરિશ્રમવિનોદં કરોત્વાર્યઃ ।
રાજાઃ – નૂનં યૂયમપ્યનેન કર્મણા પરિશ્રાન્તાઃ ।
અનસૂયા – હલા શકુન્તલે ઉચિતં નઃ પર્યુપાસનમતિથીનામ્ ।
અત્રોપવિશામઃ ।
( ઇતિ સર્વા ઉપવિશન્તિ )
શકુંતલા – ( આત્મગતમ્ )
કિં નુ ખલ્વિમં પ્રેક્ષ્ય તપોવનવિરોધિનો વિકારસ્ય ગમનીયાસ્મિ
સંવૃત્તા ।
રાજાઃ – ( સર્વા વિલોક્ય )
અહો સમવયોરૂપરમણીયં ભવતીનાં સૌહાર્દમ્ ।
પ્રિયંવદા – ( જનાન્તિકમ્ )
અનસૂયે કો નુ ખલ્વેષ ચતુરગમ્ભીરાકૃતિર્મધુરં
પ્રિયમાલપન્પ્રભાવવાનિવ લક્ષ્યતે ।
અનસૂયા – સખિ મમાપ્યસ્તિ કૌતૂહલમ્ । પૃચ્છામિ તાવદેનમ્ ।
( પ્રકાશમ્ )
આર્યસ્ય મધુરાલાપજનિતો વિશ્રમ્ભો માં મન્ત્રયતે કતમ આર્યેણ
રાજર્ષિવંશોઽલંક્રિયતે કતમો વા વિરહપર્યુત્સુકજનઃ કુતો દેશઃ
કિન્નિમિત્તં વા સુકુમારતરોઽપિ તપોવનગમનપરિશ્રમસ્યાત્મા
પદમુપનીતઃ ।
શકુંતલા – ( આત્મગતમ્ )
હૃદય મોત્તામ્ય । એષા ત્વયા ચિન્તિતાન્યનસૂયા મન્ત્રયતે ।
રાજાઃ – ( આત્મગતમ્ )

કથમિદાનીં આત્માનં નિવેદયામિ કથં વાત્માપહારં કરોમિ । ભવતુ ।
એવં તાવદેનાં વક્ષ્યે ।
( પ્રકાશમ્ )
ભવતિ યઃ પૌરવેણ રાજ્ઞા ધર્માધિકારે નિયુક્તઃ
સોહમવિઘ્નક્રિયોપલમ્ભાય ધર્મારણ્યમિદં આયાતઃ ।
( શકુંતલા શ‍ૃઙ્ગારલજ્જાં રૂપયતિ )
અનસૂયા – ( ઉભયોરાકારં વિદિત્વા । જનાન્તિકમ્ )
હલા શકુન્તલે યદ્યત્રાદ્ય તાતઃ સંનિહિતો ભવેત્ ।
શકુંતલા – તતઃ કિં ભવેત્ ।
સખ્યૌ – ઇમં જીવિતસર્વસ્વેનાપ્યતિથિવિશેષં કૃતાર્થં
કરિષ્યતિ ।
શકુંતલા – યુવામપેતમ્ । કિમપિ હૃદયે કૃત્વા મત્રયેથે । ન
યુવયોર્વચનં શ્રોષ્યામિ ।
રાજાઃ – વયમપિ તાવદ્ભવત્યોઃ સખીગતં કિમપિ પૃચ્છામઃ ।
સખ્યૌ – આર્ય અનુગ્રહ ઇવેયમભ્યર્થના ।
રાજાઃ – ભગવાન્કાશ્યપઃ શાશ્વતે બ્રહ્મણિ સ્થિત ઇતિ પ્રકાશઃ ।
ઇયં ચ વઃ સખી તદાત્મજેતિ કથમેતત્ ।
અનસૂયા – શ‍ૃણોત્વાર્યઃ । અસ્તિ કોઽપિ કૌશિક ઇતિ ગોત્રનામધેયો
મહાપ્રભાવો રાજર્ષિઃ ।
રાજાઃ – અસ્તિ । શ્રૂયતે ।
અનસૂયા – તમાવયોઃ પ્રિયસખ્યાઃ પ્રભવમવગચ્છ । ઉજ્ઝિતાયાઃ
શરીરસંવર્ધનાદિભિસ્તાતકાશ્યપોઽસ્યાઃ પિતા ।
રાજાઃ – ઉજ્ઝિતશબ્દેન જનિતં મે કૌતૂહલમ્ ।
આમૂલાચ્છ્રોતુમિચ્છામિ ।
અનસૂયા – શ‍ૃણોત્વ્ આર્યઃ । ગૌતમીતીરે પુરા કિલ તસ્ય
રાજર્ષેરુગ્રે તપસિ વર્તમાનસ્ય કિમપિ જાતશઙ્કૈર્દેવૈર્મેનકા
નામાપ્સરાઃ પ્રેષિતા નિયમવિઘ્નકારિણી ।
રાજાઃ – અસ્ત્યેતદન્યસમાધિભીરુત્વં દેવાનામ્ ।
અનસૂયા – તતો વસંતોદારસમયે તસ્યા ઉન્માદયિતૃ રૂપં પ્રેક્ષ્ય -
( ઇત્યર્ધોક્તે લજ્જયા વિરમતિ )
રાજાઃ – પરસ્તાજ્જ્ઞાયત એવ । સર્વથાપ્સરઃસમ્ભવૈષા ।
અનસૂયા – અથ કિમ્ ।

રાજાઃ – ઉપપદ્યતે ।
માનુષીષુ કથં વા સ્યાદસ્ય રૂપસ્ય સમ્ભવઃ ।
ન પ્રભાતરલં જ્યોતિરુદેતિ વસુધાતલાત્ ॥ ૨૩॥

( શકુંતલાઽધોમુખી તિષ્ઠતિ )
રાજાઃ – ( આત્મગતમ્ )
લબ્ધાવકાશો મે મનોરથઃ । કિં તુ સખ્યા પરિહાસોદાહૃતાં
વરપ્રાર્થનાં શ્રુત્વા ધૃતદ્વૈધીભાવકાતરં મે મનઃ ।
પ્રિયંવદા – ( સસ્મિતં શકુંતલાં વિલોક્ય નાયકાભિમુખી ભૂત્વા )
પુનરપિ વક્તુકામ ઇવાર્યઃ ।
( શકુંતલા સખીમઙ્ગુલ્યા તર્જયતિ )
રાજાઃ – સમ્યગુપલક્ષિતં ભવત્યા । અસ્તિ નઃ
સચ્ચરિતશ્રવણલોભાદન્યદપિ પ્રષ્ટવ્યમ્ ।
પ્રિયંવદા – અલં વિચાર્ય । અનિયન્ત્રણાનુયોગસ્તપસ્વિજનો નામ ।
રાજાઃ – ઇતિ સખીં તે જ્ઞાતુમિચ્છામિ ।
વૈખાનસં કિમનયા વ્રતમાપ્રદાનાદ્ -
વ્યાપારરોધિ મદનસ્ય નિષેવિતવ્યમ્ ।
અત્યન્તમાત્મસદૃશેક્ષણવલ્લભાભિરાહો
નિવત્સ્યતિ સમં હરિણાઙ્ગનાભિ ॥ ૨૪॥

પ્રિયંવદા – આર્ય ધર્મચરણેઽપિ પરવશોઽયં જનઃ । ગુરોઃ
પુનરસ્યા અનુરૂપવરપ્રદાને સંકલ્પઃ ।
રાજાઃ – ( આત્મગતમ્ )
ન દુરવાપેયં ખલુ પ્રાર્થના ।
ભવ હૃદય સાભિલાષં સમ્પ્રતિ સંદેહનિર્ણયો જાતઃ ।
આશઙ્કસે યદગ્નિં તદિદં સ્પર્શક્ષમં રત્નમ્ ॥ ૨૫॥

શકુંતલા – ( સરોષમિવ )
અનસૂયે ગમિષ્યામ્યહમ્ ।
અનસૂયા – કિન્નિમિત્તમ્ ।
શકુંતલા – ઇમામસમ્બદ્ધપ્રલાપિનીં પ્રિયંવદાં આર્યાયૈ ગૌતમ્યૈ
નિવેદયિષ્યામિ ।
અનસૂયા – સખિ ન યુક્તમકૃતસત્કારમતિથિવિશેષં વિસૃજ્ય
સ્વચ્છન્દતો ગમનમ્ ।

( શકુંતલા ન કિંચિદુક્ત્વા પ્રસ્થિતૈવ )
રાજાઃ – ( ગ્રહીતુમિચ્છન્નિગૃહ્યાત્માનમ્ । આત્મગતમ્ )
અહો ચેષ્ટાપ્રતિરૂપિકા કામિજનમનોવૃત્તિઃ । અહં હિ
અનુયાસ્યન્મુનિતનયાં સહસા વિનયેન વારિતપ્રસરઃ ।
સ્થાનાદનુચ્ચલન્નપિ ગત્વેવ પુનઃ પ્રતિનિવૃત્તઃ ॥ ૨૬॥

પ્રિયંવદા – ( શકુંતલાં નિરુધ્ય )
હલા ન તે યુક્તં ગન્તુમ્ ।
શકુંતલા – ( સભ્રૂભઙ્ગમ્ )
કિન્નિમિત્તમ્ ।
પ્રિયંવદા – વૃક્ષસેચને દ્વે ધારયસિ મે । એહિ તાવત્ । આત્માનં
મોચયિત્વા તતો ગમિષ્યસિ ।
( ઇતિ બલાદેનાં નિવર્તયતિ )
રાજાઃ – ભદ્રે વૃક્ષસેચનાદેવ પરિશ્રાન્તામત્રભવતીં લક્ષયે ।
તથા હ્યસ્યાઃ
સ્રસ્તાંસાવતિમાત્રલોહિતતલૌ બાહૂ ઘટોત્ક્ષેપણાદદ્યપિ સ્તનવેપથું
જનયતિ શ્વાસઃ પ્રમાણાધિકઃ ।
બદ્ધં કર્ણશિરીષરોધિ વદને ધર્મામ્ભસાં જાલકં
બન્ધે સ્રંસિનિ ચૈકહસ્તયમિતાઃ પર્યાકુલા મૂર્ધજાઃ ॥ ૨૭॥

તદહમેનાનૃણાં કરોમિ ।
( ઇત્યઙ્ગુલીયં દાતુમિચ્છતિ )
( ઉભે નામમુદ્રાક્ષરાણ્યનુવાચ્ય પરસ્પરમવલોકયતઃ )
રાજાઃ – અલમસ્માનન્યથા સમ્ભાવ્ય । રાજ્ઞઃ પરિગ્રહોયમિતિ
રાજપુરુષ મામવગચ્છત ।
પ્રિયંવદા – તેન હિ નાર્હત્યઙ્ગુલીયકમઙ્ગુલીવિયોગમ્ । આર્યસ્ય
વચનેનાનૃણેદાનીમેષા ।
( કિઞ્ચિદ્વિહસ્ય )
હલા શકુન્તલે મોચિતાસ્યનુકમ્પિનાર્યેણ । અથવા મહારાજેન ।
ગચ્છેદાનીમ્ ।
શકુંતલા – ( આત્મગતમ્ )
યદ્યાત્મનઃ પ્રભવિષ્યામિ ।
( પ્રકાશમ્ )

કા ત્વં વિસ્રષ્ટવ્યસ્ય રોદ્ધવ્યસ્ય વા ।
રાજાઃ – ( શકુંતલાં વિલોક્ય । આત્મગતમ્ )
કિં નુ ખલુ યથા વયમસ્યામેવમિયમપ્યસ્માન્પ્રતિ સ્યાત્ । અથવા
લબ્ધાવકાશા મે પ્રાર્થના । કુતઃ ।
વાચં ન મિશ્રયતિ યદ્યપિ મદ્વચોભિઃ
કર્ણં દદાત્યભિમુખં મયિ ભાષમાણે ।
કામં ન તિષ્ઠતિ મદાનનસમ્મુખીના
ભૂયિષ્ઠમન્યવિષયા ન તુ દૃષ્ટિરસ્યાઃ ॥ ૨૮॥

( નેપથ્યે )
ભો ભોસ્તપસ્વિનઃ સન્નિહિતાસ્તપોવનસત્ત્વરક્ષાયૈ ભવત । પ્રત્યાસન્નઃ
કિલ મૃગયાવિહારી પાર્થિવો દુષ્યન્તઃ ।
તુરગખુરહતસ્તથા હિ રેણુર્વિટપવિષક્તજલાર્દ્રવલ્કલેષુ ।
પતતિ પરિણતારુણપ્રકાશઃ શલભસમૂહ ઇવાશ્રમદ્રુમેષુ ॥ ૨૯॥

અપિ ચ ।
તીવ્રાઘાતપ્રતિહતતરુસ્કન્ધલગ્નૈકદન્તઃ
પાદાકૃષ્ટવ્રતતિવલયાસઙ્ગસંજાતપાશઃ ।
મૂર્તો વિઘ્નસ્તપસ ઇવ નો ભિન્નસારઙ્ગયૂથો
ધર્મારણ્યં પ્રવિશતિ ગજઃ સ્યન્દનાલોકભીતઃ ॥ ૩૦॥

( સર્વાઃ કર્ણં દત્ત્વા કિંચિદિવ સમ્ભ્રાન્તાઃ )
રાજાઃ – ( આત્મગતમ્ )
અહો ધિક્ પૌરા અસ્મદન્વેષિણસ્તપોવનુપરુન્ધન્તિ । ભવતુ ।
પ્રતિગમિષ્યામસ્તાવત્ ।
સખ્યૌ – આર્ય અનેનારણ્યકવૃત્તાન્તેન પર્યાકુલાઃ સ્મઃ । અનુજાનીહિ
ન ઉટજગમનાય ।
રાજાઃ – ( સસમ્ભ્રમમ્ )
ગચ્છન્તુ ભવત્યઃ । વયમપ્યાશ્રમપીડા યથા ન ભવતિ તથા
પ્રયતિષ્યામહે ।
( સર્વે ઉત્તિષ્ઠન્તિ )
સખ્યૌ – આર્ય અસમ્ભાવિતાતિથિસત્કારં ભૂયોઽપિ પ્રેક્ષણનિમિત્તં
લજ્જામહે આર્યં વિજ્ઞાપયિતુમ્ ।
રાજાઃ – મા મૈવમ્ । દર્શનેનૈવ ભવતીનાં પુરસ્કૃતોઽસ્મિ ।

શકુંતલા – અનસૂયે અભિનવકુશસૂચ્યા પરિક્ષતં મે ચરણં
કુરબકશાખાપરિલગ્નં ચ વલ્કલમ્ । તાવત્પરિપાલયત માં
યાવદેતન્મોચયામિ ।
( શકુંતલા રાજાનમવલોકયન્તી સવ્યાજં વિલમ્બ્ય સહ સખીભ્યાં
નિષ્ક્રાન્તા )
રાજાઃ – મન્દૌત્સુક્યોઽસ્મિ નગરગમનં પ્રતિ ।
યાવદનુયાત્રિકાન્સમેત્ય નાતિદૂરે તપોવનસ્ય નિવેશયેયમ્ । ન ખલુ
શક્નોમિ શકુંતલાવ્યાપારાદાત્માનં નિવર્તયિતુમ્ । મમ હિ
ગચ્છતિ પુરઃ શરીરં ધાવતિ પશ્ચાદસંસ્તુતં ચેતઃ ।
ચીનાંશુકમિવ કેતોઃ પ્રતિવાતં નીયમાનસ્ય ॥ ૩૧॥

( ઇતિ નિષ્ક્રાન્તાઃ સર્વે )

( ઇતિ પ્રથમોઽઙ્કઃ । )

દ્વિતીયોઽઙ્કઃ ।

( તતઃ પ્રવિશતિ વિષણ્ણો વિદૂષકઃ )
વિદૂષકઃ – ( નિઃશ્વસ્ય )
ભો દિષ્ટમ્ । એતસ્ય મૃગયાશીલસ્ય રાજ્ઞો વયસ્યભાવેન નિર્વિણ્ણોઽસ્મિ
। અયમ્ મૃગોઽયં વહારોઽયં શાર્દૂલ ઇતિ મધ્યાહ્નેઽપિ
ગ્રીષ્મવિરલપાદપછાયાસુ વનરાજિષ્વાહિણ્ડયતે અટવીતોઽટવી ।
પત્રસઙ્કરકષાયાણિ કટુષ્ણાનિ ગિરિનદીજલાનિ પીયન્તે । અનિયતવેલં
શૂલ્યમાંસભૂયિષ્ઠ આહારો ભુજ્યતે । તુરગાનુધાવનકણ્ડિતસંધે
રાત્રાવપિ નિકામં શયિતવ્યં નાસ્તિ । તતો મહત્યેવ પ્રત્યૂષે
દાસ્યાઃપુત્રૈઃ શકુનિલુબ્ધકૈર્વનગ્રહણકોલાહલેન પ્રતિબોધિતોઽસ્મિ ।
ઇયતેદાનીમપિ પીડા ન નિષ્ક્રામતિ । તતો ગણ્ડસ્યોપરિ પિણ્ડકઃ
સંવૃત્તઃ । હ્યઃ કિલાસ્માસ્વવહીનેષુ તત્ર ભવતો
મૃગાનુસારેણાશ્રમપદં પ્રવિષ્ટસ્ય તાપસકન્યકા શકુંતલા
મમાધન્યતયા દર્શિતા । સામ્પ્રતં નગરગમનાય મનઃ કથમપિ ન
કરોતિ । અદ્યાપિ તસ્ય તામેવ ચિન્તયતોઽક્ષ્ણોઃ પ્રભાતમાસીત્ । કા ગતિઃ
। યાવત્તં કૃતાચારપરિક્રમં પશ્યામિ ।
( ઇતિ પરિક્રમ્યાવલોક્ય ચ )
એષ બાણાસનહસ્તાભિર્યવનીભિર્વનપુષ્પમાલાધારિણીભિઃ પરિવૃત

ઇત એવાગચ્છતિ પ્રિયવયસ્યઃ । ભવતુ । અન્ગભન્ગવિકલ ઇવ ભૂત્વા સ્થાસ્યામિ । યદ્યેવમપિ નામ વિશ્રમં લભેય ।

( ઇતિ દણ્ડકાષ્ઠમવલમ્બ્ય સ્થિતઃ )

( તતઃ પ્રવિશતિ યથાનિર્દિષ્ટપરિવારો રાજા )

રાજાઃ –

કામં પ્રિયા ન સુલભા મનસ્તુ તદ્ભાવદર્શનાશ્વાસિ ।
અકૃતાર્થેઽપિ મનસિજે રતિમુભયપ્રાર્થના કુરુતે ॥ ૧॥

( સ્મિતં કૃત્વા )

એવમાત્માભિપ્રાયસમ્ભાવિતેષ્ટજનચિત્તવૃત્તિઃ પ્રાર્થયિતા વિડમ્બ્યતે
।

સ્નિગ્ધં વીક્ષિતમન્યતોઽપિ નયને યત્પ્રેરયન્ત્યા તયા
યાતં યચ્ચ નિતમ્બયોર્ગુરુતયા મન્દં વિલાસાદિવ ।
મા ગા ઇત્યુપરુદ્ધયા યદપિ સા સાસૂયમુક્તા સખી
સર્વં તત્કિલ મત્પરાયણમહો કામી સ્વતાં પશ્યતિ ॥ ૨॥

વિદૂષકઃ – ( તથાસ્થિત એવ )

ભો વયસ્ય ન મે હસ્તપાદં પ્રસરતિ તદ્વાઙ્માત્રેણ જાપયિષ્યામિ ।

જયતુ જયતુ ભવાન્ ।

રાજાઃ – કુતોઽયં ગાત્રોપઘાતઃ ।

વિદુષકઃ – કુતઃ કિલ સ્વયમક્ષ્યાકુલીકૃત્યાશ્રુકારણં પૃચ્છસિ
।

રાજાઃ – ન ખલ્વાવગચ્છામિ ।

વિદુષકઃ – ભો વયસ્ય યદ્વેતસઃ કુબ્જલીલાં વિડમ્બયતિ તત્કિમાત્મનઃ પ્રભાવેણ નનુ નદીવેગસ્ય ।

રાજાઃ – નદીવેગસ્તત્ર કારણમ્ ।

વિદુષકઃ – મમાપિ ભવાન્ ।

રાજાઃ – કથમિવ ।

વિદુષકઃ – એવં રાજકાર્યાણ્યુજ્ઝિત્વૈતાદૃશ આકુલપ્રદેશે વનચરવૃત્તિના ત્વયા ભવિતવ્યમ્ । યત્સત્યં પ્રત્યહં શ્વાપદસમુત્સારણૈઃ સંક્ષોભિતસંધિબન્ધાનાં મમ ગાત્રાણામનીશોઽસ્મિ સંવૃત્તઃ । તત્પ્રસીદ મે । એકાહમપિ તાવદ્વિશ્રમ્યતામ્ ।

રાજાઃ – ( સ્વગતમ્ )
અયં ચૈવમાહ । મમાપિ કાશ્યપસુતામનુસ્મૃત્ય મૃગયાવિક્લવં ચેતઃ ।
કુતઃ ।
ન નમયિતુમધિજ્યમસ્મિ શક્તો ધનુરિદમાહિતસાયકં મૃગેષુ ।
સહવસતિમુપેત્ય યૈઃ પ્રિયાયાઃ કૃત ઇવ મુગ્ધવિલોકિતોપદેશઃ ॥ ૩॥

વિદૂષકઃ – ( રાજ્ઞો મુખં વિલોક્ય )
અત્રભવાન્કિમપિ હૃદયે કૃત્વા મન્ત્રયતે । અરણ્યે મયા રુદિતમાસીત્ ।

રાજાઃ – ( સસ્મિતમ્ )
કિમન્યત્ । અનતિક્રમણીયં મે સુહૃદ્વાક્યમિતિ સ્થિતોऽસ્મિ ।
વિદૂષકઃ – ચિરં જીવ ।
( ઇતિ ગન્તુમિછતિ )
રાજાઃ – વયસ્ય તિષ્ઠ । સાવશેષં મે વચઃ ।
વિદૂષકઃ – આજ્ઞાપયતુ ભવાન્ ।
રાજાઃ – વિશ્રાન્તેન ભવતા મમાપ્યેકસ્મિન્નનાયાસે કર્મણિ સહાયેન ભવિતવ્યમ્ ।
વિદૂષકઃ – કિં મોદકખાદિકાયામ્ । તેન હ્યયં સુગૃહીતઃ ક્ષણઃ ।
રાજાઃ – યત્ર વક્ષ્યામિ । કઃ કોऽત્ર ભોઃ ।
( પ્રવિશ્ય )
દૌવારિકઃ – ( પ્રણમ્ય )
આજ્ઞાપયતુ ભર્ત્તા ।
રાજાઃ – રૈવતક સેનાપતિસ્તાવદાહૂયતામ્ ।
દૌવારિકઃ – તથા ।
( ઇતિ નિષ્ક્રમ્ય સેનાપતિના સહ પુનઃ પ્રવિશ્ય )
એષ આજ્ઞાવચનોત્કણ્ઠો ભર્તેતોદત્તદૃષ્ટિરેવ તિષ્ઠતિ ।
ઉપસર્પત્વાર્યઃ ।
સેનાપતિ – ( રાજાનમવલોક્ય )
દૃષ્ટદોષાપિ સ્વામિનિ મૃગયા કેવલં ગુણ એવ સંવૃત્તા । તથા હિ દેવઃ
અનવરતધનુર્જ્યાસ્ફાલનક્રૂરપૂર્વ
રવિકિરણસહિષ્ણુ સ્વેદલેશૈરભિન્નમ્ ।
અપચિતમપિ ગાત્રં વ્યાયતત્વાદલક્ષ્યં

ગિરિચર ઇવ નાગઃ પ્રાણસારં બિભર્તિ ॥ ૪॥

( ઉપેત્ય )

જયતુ જયતુ સ્વામી । ગૃહીતશ્વાપદમરણ્યમ્ । કિમન્યત્રાવસ્થીયતે ।

રાજાઃ – મન્દોત્સાહઃ કૃતોઽસ્મિ મૃગયાપવાદિના માધવ્યેન ।

સેનાપતિ – ( જનાન્તિકમ્ )

સખે સ્થિરપ્રતિબન્ધો ભવ । અહં

તાવત્સ્વામિનશ્ચિત્તવૃત્તિમનુવર્તિષ્યે ।

( પ્રકાશમ્ )

પ્રલપત્વેષ વૈધેયઃ । નનુ પ્રભુરેવ નિદર્શનમ્ ।

મેદશ્છેદકૃશોદરં લઘુ ભવત્યુત્થાનયોગ્યં વપુઃ

સત્ત્વાનામપિ લક્ષ્યતે વિકૃતિમચ્ચિત્તં ભયક્રોધયોઃ ।

ઉત્કર્ષઃ સ ચ ધન્વિનાં યદિષવઃ સિધ્યન્તિ લક્ષ્યે ચલે

મિથ્યૈવ વ્યસનં વદન્તિ મૃગયામીદૃગ્વિનોદઃ કુતઃ ॥ ૫॥

વિદુષકઃ – અપેહિ રે ઉત્સાહહેતુક । અત્રભવાન્પ્રકૃતિમાપન્નઃ । ત્વં

તાવદટવીતોઽટવીમાહિણ્ડમાનો નરનાસિકાલોલુપસ્ય જીર્ણર્ક્ષિસ્ય કસ્યાપિ

મુખે પતિષ્યસિ ।

રાજાઃ – ભદ્ર સેનાપતે આશ્રમસંનિકૃષ્ટે સ્થિતાઃ સ્મઃ । અતસ્તે

વચો નાભિનન્દામિ । અદ્ય તાવત્ ।

ગાહન્તાં મહિષા નિપાનસલિલં શ◌ૃઙ્ગૈર્મુહુસ્તાડિતમ્

છાયાબદ્ધકદમ્બકં મૃગકુલં રોમન્થમભ્યસ્યતુ ।

વિશ્રબ્ધં ક્રિયતાં વરાહતતિભિર્મુસ્તાક્ષતિઃ પલ્વલે

વિશ્રામં લભતામિદં ચ શિથિતલજ્યાબન્ધમસ્મદ્ધનુઃ ॥ ૬॥

સેનાપતિ – યત્પ્રભવિષ્ણવે રોચતે ।

રાજાઃ – તેન હિ નિવર્તય પૂર્વગતાન્વનગ્રાહિણઃ । યથા ન મે

સૈનિકાસ્તપોવનમુપરુન્ધન્તિ તથા નિષેદ્ધવ્યાઃ । પશ્ય ।

શમપ્રધાનેષુ તપોધનેષુ ગૂઢં હિ દાહાત્મકમસ્તિ તેજઃ ।

સ્પર્શાનુકૂલા ઇવ સૂર્યકાન્તાસ્તદન્યતેજોઽભિભવાદ્વમન્તિ ॥ ૭॥

સેનાપતિ – યદાજ્ઞાપયતિ સ્વામી ।

વિદુષકઃ – ધ્વંસતાં તે ઉત્સાહવૃત્તાન્તઃ ।

( નિષ્ક્રાન્તઃ સેનાપતિઃ )

રાજાઃ – ( પરિજનં વિલોક્ય )
અપનયન્તુ ભવત્યો મૃગયાવેશમ્ । રૈવતક ત્વમપિ સ્વં નિયોગમશૂન્યં
કુરુ ।
પરિજન – યદ્દેવ આજ્ઞાપયતિ ।
( ઇતિ નિષ્ક્રાન્તઃ )
વિદુષકઃ – કૃતં ભવતા નિર્મક્ષિકમ્ ।
સામ્પ્રતમેતસ્મિન્પાદપછાયાવિરચિતવિતાનસનાથે શિલાતલે નિષીદતુ
ભવાન્યાવદહમપિ સુખાસીનો ભવામિ ।
રાજાઃ – ગચ્છાગ્રતઃ ।
વિદુષકઃ – એતુ ભવાન્ ।
( ઇત્યુભૌ પરિક્રમ્યોપવિષ્ટૌ )
રાજાઃ – માધવ્ય અનવાપ્તચક્ષુઃફલોઽસિ । યેન ત્વયા દર્શનીયં ન
દૃષ્ટમ્ ।
વિદુષકઃ – નનુ ભવાનગ્રતો મે વર્તતે ।
રાજાઃ – સર્વઃ કાન્તમાત્મીયં પશ્યતિ । અહં તુ તાં
એવાશ્રમલલામભૂતાં શકુંતલામધિકૃત્ય બ્રવીમિ ।
વિદુષકઃ – ( સ્વગતમ્ ) ભવતુ । અસ્યાવસરં ન દાસ્યે ।
( પ્રકાશમ્ )
ભો વયસ્ય તે તાપસકન્યકાભ્યર્થનીયા દૃશ્યતે ।
રાજાઃ – સખે ન પરિહાર્યે વસ્તુનિ પૌરવાણાં મનઃ પ્રવર્તતે ।
સુરયુવતિસમ્ભવં કિલ મુનેરપત્યં તદુજ્ઝિતાધિગતમ્ ।
અર્કસ્યોપરિ શિથિલં ચ્યુતમિવ નવમાલિકાકુસુમમ્ ॥ ૮॥

વિદુષકઃ – ( વિહસ્ય )
યથા કસ્યાપિ પિણ્ડખર્જૂરૈરુદ્વેજિતસ્ય તિણ્ડ્યાં
( તિન્તિણ્યાં )
અભિલાષો ભવેત્તથા સ્ત્રીરત્નપરિભોગિણઃ ભવત ઇયમભ્યર્થના ।
રાજાઃ – ન તાવદેનાં પશ્યાસિ યેનૈવમવાદીઃ ।
વિદુષકઃ – તત્ખલુ રમણીયં યદ્ભવતોઽપિ વિસ્મયમુત્પાદયતિ ।
રાજાઃ – વયસ્ય કિં બહુના ।
ચિત્રે નિવેશ્ય પરિકલ્પિતસત્ત્વયોગા
રૂપોચ્ચયેન મનસા વિધિના કૃતા નુ ।

સ્ત્રીરત્નસૃષ્ટિરપરા પ્રતિભાતિ સા મે
ધાતુર્વિભુત્વમનુચિન્ત્ય વપુશ્ચ તસ્યાઃ ॥ ૯॥

વિદુષકઃ – યથેવં પ્રત્યાદેશ ઇદાનીં રૂપવતીનામ્ ।
રાજાઃ – ઇદં ચ મે મનસિ વર્તતે ।
અનાઘ્રાતં પુષ્પં કિસલયમલૂનં કરરુહૈરનાવિદ્ધં
રત્નં મધુ નવમનાસ્વાદિતરસમ્ ।
અખણ્ડં પુણ્યાનાં ફલમિવ ચ તદ્રૂપમનઘં ન જાને
ભોક્તારં કમિહ સમુપસ્થાસ્યતિ વિધિઃ ॥ ૧૦॥

વિદુષકઃ – તેન હિ લઘુ પરિત્રાયતામેનાં ભવાન્ । મા કસ્યાપિ
તપસ્વિન ઇન્ગુદીતૈલચિક્કણશીર્ષસ્ય હસ્તે પતિષ્યતિ ।
રાજા – પરવતી ખલુ તત્રભવતી । ન ચ સંનિહિતોઽત્ર ગુરુજનઃ ।
વિદુષકઃ – અથ ભવન્તમન્તરેણ કીદૃશસ્તસ્યા દૃષ્ટિરાગઃ ।
રાજાઃ – નિસર્ગાદેવાપ્રગલ્ભસ્તપસ્વિકન્યાજનઃ । તથાપિ તુ
અભિમુખે મયિ સમ્હૃતમીક્ષિતં હસિતમન્યનિમિત્તકૃતોદયમ્ ।
વિનયવારિતવૃત્તિરતસ્તયા ન વિવૃતો મદનો ન ચ સંવૃતઃ ॥ ૧૧॥

વિદુષકઃ – ન ખલુ દૃષ્ટમાત્રસ્ય તવાઙ્કં સમારોહતિ ।
રાજાઃ – મિથઃ પ્રસ્થાને પુનઃ શાલીનતયાપિ કામમાવિષ્કૃતો
ભાવસ્તત્રભવત્યા । તથા હિ ।
દર્ભાઙ્કુરેણ ચરણઃ ક્ષત ઇત્યકાણ્ડે તન્વી
સ્થિતા કતિચિદેવ પદાનિ ગત્વા ।
આસીદ્વિવૃત્તવદના ચ વિમોચયન્તી
શાખાસુ વલ્કલમસક્તમપિ દ્રુમાણામ્ ॥ ૧૨॥

વિદુષકઃ – તેન હિ ગૃહીતપાથેયો ભવ । કૃતં ત્વયોપવનં
તપોવનમિતિ પશ્યામિ ।
રાજાઃ – સખે તપસ્વિભિઃ કૈશ્ચિત્પરિજ્ઞાતોઽસ્મિ । ચિન્તય
તાવત્કેનાપદેશેન પુનરાશ્રમપદં ગચ્છામઃ ।
વિદુષકઃ – કોઽપરોઽપદેશો યુષ્માકં રાજ્ઞામ્ ।
નીવારષષ્ઠભાગમસ્માકમુપહરન્ત્વિતિ ।
રાજાઃ – મૂર્ખ અન્યમેવ ભાગધેયમેતે તપસ્વિનો નિર્વપન્તિ યો
રત્નરાશીનપિ વિહાયાભિનન્દ્યતે । પશ્ય ।

યદુત્તિષ્ઠતિ વર્ણેભ્યો નૃપાણાં ક્ષયિ તત્ફલમ્ ।
તપઃષડ્ભાગમક્ષય્યં દદત્યારણ્યકા હિ નઃ ॥ ૧૩॥

( નેપથ્યે )

હન્ત સિદ્ધાર્થૌ સ્વઃ ।

રાજાઃ – ( કર્ણં દત્ત્વા )

અયે ધીરપ્રશાન્તસ્વરૈસ્તપસ્વિભિર્ભવિતવ્યમ્ ।

( પ્રવિશ્ય )

દૌવારિકઃ – જયતુ જયતુ ભર્તા । એતૌ દ્વૌ ઋષિકુમારૌ પ્રતીહારભૂમિમુપસ્થિતૌ ।

રાજાઃ – તેન હ્યવિલમ્બિતં પ્રવેશય તૌ ।

દૌવારિકઃ – એષ પ્રવેશયામિ ।

( ઇતિ નિષ્ક્રમ્ય ઋષિકુમારાભ્યાં સહ પ્રવિશ્ય )

( ઉભૌ રાજાનં વિલોકયતઃ )

પ્રથમઃ – અહો દીપ્તિમતોઽપિ વિશ્વસનીયતાસ્ય વપુષઃ । અથવા ઉપપન્નમેતદસ્મિન્ ઋષિભ્યો નાતિભિન્ને રાજનિ । કુતઃ ।

અધ્યાક્રાન્તા વસતિરમુનાપ્યાશ્રમે સર્વભોગ્યે
રક્ષાયોગાદયમપિ તપઃ પ્રત્યહં સંચિનોતિ ।
અસ્યાપિ દ્યાં સ્પૃશતિ વશિનશ્ચારણદ્વન્દ્વગીતઃ
પુણ્યઃશબ્દો મુનિરિતિ મુહુઃ કેવલં રાજપૂર્વઃ ॥ ૧૪॥

દ્વિતીયઃ – ગૌતમ અયં સ બલભિત્સખો દુષ્યન્તઃ ।

પ્રથમઃ – અથ કિમ્ ।

દ્વિતીયઃ – તેન હિ

નૈતચ્ચિત્રં યદયમુદધિશ્યામસીમાં ધરિત્રીમેકઃ
કૃત્સ્નાં નગરપરિઘપ્રાંશુબાહુર્ભુનક્તિ ।
આશંસન્તે સમિતિષુ સુરા બદ્ધવૈરા હિ દૈત્યૈરસ્યાધિજ્યે
ધનુષિ વિજયં પૌરુહૂતે ચ વજ્રે ॥ ૧૫॥

ઉભૌ – ( ઉપગમ્ય )

વિજયસ્વ રાજન્ ।

રાજાઃ – ( આસનાદુત્થાય )

અભિવાદયે ભવન્તૌ ।

ઉભૌ – સ્વસ્તિ ભવતે ।

( ઇતિ ફલાન્યુપહરતઃ )

રાજાઃ – ( સપ્રણામં પરિગૃહ્યઃ )

આજ્ઞાપયિતુમિચ્છામિ ।

ઉભૌ – વિદિતો ભવાનાશ્રમસદામિહસ્થઃ । તેન ભવન્તં પ્રાર્થયન્તે

।

રાજાઃ – કિમાજ્ઞાપયન્તિ ।

ઉભૌ – તત્રભવતઃ કણ્વસ્ય મહર્ષેરસાંનિધ્યાદ્રક્ષાંસિ ન

ઇષ્ટિવિઘ્નમુત્પાદયન્તિ । તત્કતિપયરાત્રં સારથિદ્વિતીયેન ભવતા

સનાથીક્રિયતામાશ્રમ ઇતિ ।

રાજાઃ – અનુગૃહીતોઽસ્મિ ।

વિદુષકઃ – ( અપવાર્ય )

એષેદાનીમનુકૂલા તેઽભ્યર્થના ।

રાજાઃ – ( સ્મિતં કૃત્વા )

રૈવતક મદ્વચનાદુચ્યતાં સારથિઃ । સબાણાસનં રથમુપસ્થાપયેતિ

।

દૌવારિકઃ – યદ્દેવ આજ્ઞાપયતિ ।

( ઇતિ નિષ્ક્રાન્તઃ )

ઉભૌ – ( સહર્ષમ્ )

અનુકારિણિ પૂર્વેષાં યુક્તરૂપમિદં ત્વયિ ।

આપન્નાભયસત્રેષુ દીક્ષિતાઃ ખલુ પૌરવાઃ ॥ ૧૬॥

રાજાઃ – ( સપ્રણામમ્ )

ગચ્છતાં પુરો ભવન્તૌ । અહમપ્યનુપદમાગત એવ ।

ઉભૌ – વિજયસ્વ

( ઇતિ નિષ્ક્રાન્તૌ )

રાજાઃ – માધવ્ય અપ્યસ્તિ શકુંતલાદર્શને કુતૂહલમ્ ।

વિદુષકઃ – પ્રથમં સપરિવાહમાસીત્ । ઇદાનીં

રાક્ષસવૃત્તાન્તેન બિન્દુરપિ નાવશેષિતઃ ।

રાજાઃ – મા ભૈષીઃ । નનુ મત્સમીપે વર્તિષ્યસે ।

વિદુષકઃ – એષ રાક્ષસાદ્રક્ષિતોઽસ્મિ ।

( પ્રવિશ્ય )

દૌવારિકઃ – સજ્જો રથો ભર્તુર્વિજયપ્રસ્થાનમપેક્ષતે । એષ

પુનર્નગરાદ્દેવીનામાજ્ઞપ્તિહરઃ કરભક આગતઃ ।
રાજાઃ – ( સાદરમ્ )
કિમમ્બાભિઃ પ્રેષિતઃ ।
દૌવારિકઃ – અથ કિમ્ ।
રાજાઃ – નનુ પ્રવેશ્યતામ્ ।
દૌવારિકઃ – તથા ।
( ઇતિ નિષ્ક્રમ્ય કરભકેણ સહ પ્રવિશ્ય )
એષ ભર્તા । ઉપસર્પ ।
કરભકઃ – જયતુ જયતુ ભર્તા । દેવ્યાજ્ઞાપયતિ । આગામિનિ
ચતુર્થદિવસે પ્રવૃત્તપારણો મે ઉપવાસો ભવિષ્યતિ । તત્ર
દીર્ઘાયુષાવશ્યં સમ્ભાવનીયેતિ ।
રાજાઃ – ઇતસ્તપસ્વિકાર્યમ્ । ઇતો ગુરુજનાજ્ઞા ।
દ્વયમપ્યનતિક્રમણીયમ્ । કિમત્ર પ્રતિવિધેયમ્ ।
વિદુષકઃ – ત્રિશઙ્કુરિવાન્તરા તિષ્ઠ ।
રાજાઃ – સત્યમાકુલીભૂતોઽસ્મિ ।
કૃત્યયોર્ભિન્નદેશત્વાદ્ દ્વૈધીભવતિ મે મનઃ ।
પુરઃ પતિહતં શૈલે સ્રોતઃ સ્રોતોવહો યથા ॥ ૧૭॥

( વિચિન્ત્ય )
સખે ત્વમમ્બયા પુત્ર ઇતિ પ્રતિગૃહીતઃ । અતો ભવાનિતઃ પ્રતિનિવૃત્ય
તપસ્વિકાર્યવ્યગ્રમાનસં મામાવેદ્ય તત્રભવતીનાં
પુત્રકૃત્યમનુષ્ઠાતુમર્હતિ ।
વિદુષકઃ – ન ખલુ માં રક્ષોભીરુકં ગણયસિ ।
રાજાઃ – ( સસ્મિતમ્ )
કથમેતદ્ભવતિ સમ્ભાવ્યતે ।
વિદુષકઃ – યથા રાજાનુજેન ગન્તવ્યં તથા ગચ્છામિ ।
રાજાઃ – નનુ તપોવનોપરોધઃ પરિહરણીય ઇતિ
સર્વાનાનુયાત્રિકાંસ્ત્વયૈવ સહ પ્રસ્થાપયામિ ।
વિદુષકઃ – ( સગર્વમ્ )
તેન હિ યુવરાજોઽસ્મીદાનીં સંવૃત્તઃ ।
રાજાઃ – ( સ્વગતમ્ )
ચપલોઽયં બટુઃ । કદાચિદસ્મત્પ્રાર્થનામન્તઃપુરેભ્યઃ કથયેત્ ।

ભવતુ । એનમેવં વક્ષ્યે ।
( વિદૂષકં હસ્તે ગૃહીત્વા । પ્રકાશમ્ )
વયસ્ય ઋષિગૌરવાદાશ્રમં ગચ્છામિ । ન ખલુ સત્યમેવ
તાપસકન્યકાયાં મમાભિલાષઃ । પશ્ય ।
ક્વ વયં ક્વ પરોક્ષમન્મથો મૃગશાવૈઃ સમમેધિતો જનઃ ।
પરિહાસવિજલ્પિતં સખે પરમાર્થેન ન ગૃહ્યતાં વચઃ ॥ ૧૮॥

વિદુષકઃ – અથ કિમ્ ।
( ઇતિ નિષ્ક્રાન્તાઃ સર્વે )
( ઇતિ દ્વિતીયોઽઙ્કઃ । )

તૃતીયોઽઙ્કઃ ।

( તતઃ પ્રવિશતિ કુશાનાદાય યજમાનશિષ્યઃ )
શિષ્યઃ – અહો મહાનુભાવઃ પાર્થિવો દુષ્યન્તઃ । યત્પ્રવિષ્ટમાત્ર
એવાશ્રમં તત્રભવતિ નિરુપદ્રવાણિ નઃ કર્માણિ સંવૃત્તાનિ ।
કા કથા બાણસંધાને જ્યાશબ્દેનૈવ દૂરતઃ ।
હુંકારેણેવ ધનુષઃ સ હિ વિઘ્નાનપોહતિ ॥ ૧॥

યાવદિમાન્વેદિસંસ્તરણાર્થં દર્ભાનૃત્વિગ્ભ્ય ઉપહરામિ ।
( પરિક્રમ્યાવલોક્ય ચ । આકાશે )
પ્રિયંવદે કસ્યેદમુશીરાનુલેપનં મૃણાલવન્તિ ચ નલિનીપત્રાણિ
નીયન્તે ।
( શ્રુતિમભિનીય )
કિં બ્રવીષિ । આતપલઙ્ઘનાદ્બલવદસ્વસ્થા શકુંતલા તસ્યાઃ
શરીરનિર્વાપણાયેતિ । તર્હિ યત્નાદુપચર્યતામ્ । સા ખલુ ભગવતઃ
કણ્વસ્ય કુલપતેરુચ્છ્વસિતમ્ । અહમપિ તાવદ્વૈતાનિકં શાન્ત્યુદકમસ્યૈ
ગૈતમીહસ્તે વિસર્જયિષ્યામિ ।
( ઇતિ નિષ્ક્રાન્તઃ )
વિષ્કમ્ભકઃ ।
( તતઃ પ્રવિશતિ કામયમાનાવસ્થો રાજા )
રાજાઃ – ( સચિન્તં નિઃશ્વસ્ય )
જાને તપસો વીર્યં સા બાલા પરવતીતિ મે વિદિતમ્ ।
અલમસ્મિ તતો હૃદયં તથાપિ નેદં નિવર્તયિતુમ્ ॥ ૨॥

( મદનબાધાં નિરૂપ્ય )
ભગવન્કુસુમાયુધ ત્વયા ચન્દ્રમસા ચ
વિશ્વસનીયાભ્યામતિસંધીયતે કામિજનસાર્થઃ । કુતઃ ।
તવ કુસુમશરત્વં શીતરશ્મિત્વમિન્દોર્દ્વયમિદમયથાર્થં
દૃશ્યતે મદ્વિધેષુ ।
વિસૃજતિ હિમગર્ભૈરગ્નિમિન્દુર્મયૂખૈસ્ત્વમપિ
કુસુમબાણાન્વજ્રસારીકરોષિ ॥ ૩॥

અથવા ।
( અદ્યાપિ નૂનં હરકોપવહ્નિસ્ત્વયિ જ્વલત્યૌર્વ ઇવામ્બુરાશૌ ।
( ત્વમન્યથા મન્મથ મદ્વિધાનાં ભસ્માવશેષઃ
( કથમિત્થમુષ્ણઃ ॥
અનિશમપિ મકરકેતુર્મનસો રુજમાવહન્નભિમતો મે ।
યદિ મદિરાયતનયનાં તામધિકૃત્ય પ્રહરતીતિ ॥ ૪॥

( સખેદં પરિક્રમ્ય )
ક્વ નુ ખલુ સંસ્થિતે કર્મણિ સદસ્યૈરનુજ્ઞાતઃ ખિન્નમાત્માનં
વિનોદયામિ ।
( નિઃશ્વસ્ય )
કિં નુ ખલુ મે પ્રિયાદર્શનાદૃતે શરણમન્યત્ । યાવદેનામન્વિષ્યામિ
।
( સૂર્યમવલોક્ય )
ઇમામુગ્રાતપવેલાં પ્રાયેણ લતાવલયવત્સુ માલિનીતીરેષુ સસખીજના
શકુંતલા ગમયતિ । તત્રૈવ તાવદ્ગચ્છામિ ।
( પરિક્રમ્ય સંસ્પર્શં રૂપયિત્વા )
અહો પ્રવાતસુભગોઽયમુદ્દેશઃ ।
શક્યમરવિન્દસુરભિઃ કણવાહી માલિનીતરઙ્ગાણામ્ ।
અઙ્ગૈરનઙ્ગતપ્તૈરવિરલમાલિઙ્ગિતું પવનઃ ॥ ૫॥

( પરિક્રમ્યાવલોક્ય ચ )
અસ્મિન્વેતસપરિક્ષિપ્તે લતામણ્ડપે સંનિહિતયા શકુંતલયા ભવિતવ્યમ્ ।
તથા હિ ।
અભ્યુન્નતા પુરસ્તાદવગાઢા જઘનગૌરવાત્પશ્ચાત્ ।
દ્વારેઽસ્ય પાણ્ડુસિકતે પદપઙ્ક્તિર્દૃશ્યતેઽભિનવા ॥ ૬॥

યાવદ્વિટપાન્તરેણાવલોકયામિ ।
( પરિક્રમ્ય તથા કૃત્વા । સહર્ષમ્ )
અયે લબ્ધં નેત્રનિર્વાણમ્ । એષા મે મનોરથપ્રિયતમા સકુસુમાસ્તરણં
શિલાપટ્ટમધિશયાનાસખીભ્યામન્વાસ્યતે । ભવતુ । શ્રોષ્યામ્યાસાં
વિશ્રમ્ભકથિતાનિ ।
( ઇતિ વિલોકયન્સ્થિતઃ )
( તતઃ પ્રવિશતિ યથોક્તવ્યાપારા સહ સખીભ્યાં શકુંતલા )
સખ્યૌ – ( ઉપવીજ્ય । સસ્નેહમ્ )
હલા શકુન્તલે અપિ સુખયતિ તે નલિનીપત્રવાતઃ ।
શકુંતલા – કિં વીજયતો માં સખ્યૌ ।
( સખ્યૌ વિષાદં નાટયિત્વા પરસ્પરમવલોકયતઃ )
રાજાઃ – બલવદસ્વસ્થશરીરા શકુંતલા દૃશ્યતે ।
( સવિતર્કમ્ )
તત્કિમયમાતપદોષઃ સ્યાદુત યથા મે મનસિ વર્તતે ।
( સાભિલાષં નિર્વર્ણ્ય )
અથ વા કૃતં સંદેહેન ।
સ્તનન્યસ્તોશીરં પ્રશિથિલમૃણાલૈકવલયં
પ્રિયાયાઃ સાબાધં કિમપિ કમનીયં વપુરિદમ્ ।
સમસ્તાપઃ કામં મનસિજનિદાઘપ્રસરયોર્ન
તુ ગ્રીષ્મસ્યૈવં સુભગમપરાદ્ધં યુવતિષુ ॥ ૭॥

પ્રિયંવદા – ( જનાન્તિકમ્ )
અનસૂયે તસ્ય રાજર્ષેઃ પ્રથમદર્શનારભ્યપર્યુત્સુકેવ શકુંતલા ।
કિં નુ ખલ્વસ્યાસ્તન્નિમિત્તોઽયમાતઙ્કો ભવેત્ ।
અનસૂયા – સખિ મમાપીદૃશ્યાશઙ્કા હૃદયસ્ય । ભવતુ । પ્રક્ષ્યામિ
તાવદેનામ્ ।
( પ્રકાશમ્ )
સખિ પ્રષ્ટવ્યાસિ કિમપિ । બલવાન્ખલુ તે સંતાપઃ ।
શકુંતલા – ( પૂર્વાર્ધેન શયનાદુત્થાય )
હલા કિં વક્તુકામાસિ ।
અનસૂયા – હલા શકુન્તલે અનભ્યન્તરે ખલ્વાવાં મદનગતસ્ય

વૃત્તાન્તસ્ય । કિં તુ યાદૃશીતિહાસનિબન્ધેષુ
કામયમાનાનામવસ્થા શ્રૂયતે તાદૃશીં તવ પશ્યામિ । કથય
કિંનિમિત્તં તે સંતાપઃ । વિકારં ખલુ પરમાર્થતોઽજ્ઞાત્વાઽનારમ્ભઃ
પ્રતીકારસ્ય ।
રાજાઃ – અનસૂયામપ્યનુગતો મદીયસ્તર્કઃ । ન હિ સ્વાભિપ્રાયેણ મે
દર્શનમ્ ।
શકુંતલા – ( આત્મગતમ્ )
બલવાન્ખલુ મેઽભિનિવેશઃ । ઇદાનીમપિ સહસૈતયોર્ન શક્નોમિ
નિવેદયિતુમ્ ।
પ્રિયંવદા – સખિ શકુન્તલે સુષ્ઠુ એષા ભણતિ । કિમાત્મન
આતઙ્કમુપેક્ષસે । અનુદિવસં ખલુ પરિહીયસેઽઙ્ગૈઃ । કેવલં લાવણ્યમયી
છાયા ત્વાં ન મુઞ્ચતિ ।
રાજાઃ – અવિતથમાહ પ્રિયંવદા । તથા હિ
ક્ષામક્ષામકપોલમાનનમુરઃ કાઠિન્યમુક્તસ્તનં
મધ્યઃક્લાન્તતરઃ પ્રકામવિનતાવંસૌ છવિઃ પાણ્ડુરા ।
શોચ્યા ચ પ્રિયદર્શના ચ મદનક્લિષ્ટેયમાલક્ષ્યતે
પત્રાણામિવ શોષણેન મરુતા સ્પૃષ્ટા લતા માધવી ॥ ૮॥

શકુંતલા – સખિ કસ્ય વાન્યસ્ય કથયિષ્યામિ ।
કિંત્વાયાસયિત્રીદાનીં વાં ભવિષ્યામિ ।
ઉભે – અત એવ ખલુ નિર્બન્ધઃ । સ્નિગ્ધજનસંવિભક્તં હિ દુઃખં
સહ્યવેદનં ભવતિ ।
રાજાઃ – પૃષ્ટા જનેન સમદુઃખસુખેન બાલા
નેયં ન વક્ષ્યતિ મનોગતમાધિહેતુમ્ ।
દૃષ્ટો વિવૃત્ય બહુશોઽપ્યનયા સતૃષ્ણમત્રાન્તરે
શ્રવણકાતરતાં ગતોઽસ્મિ ॥ ૯॥

શકુંતલા – સખિ યતઃપ્રભૃતિ મમ દર્શનપથમાગતઃ સ
તપોવનરક્ષિતા રાજર્ષિઃ ।
( ઇત્યર્ધોક્તે લજ્જાં નાટયતિ )
ઉભે – કથયતુ પ્રિયસખી ।
શકુંતલા – તત આરભ્ય તદ્ગતેનાભિલાષેણૈતદવસ્થાસ્મિ
સંવૃત્તા ।

રાજાઃ – ( સહર્ષમ્ )
શ્રુતં શ્રોતવ્યમ્ ।
સ્મર એવ તાપહેતુર્નિર્વાપયિતા સ એવ મે જાતઃ ।
દિવસ ઇવાભ્રશ્યામસ્તપાત્યયે જીવલોકસ્ય ॥ ૧૦॥

શકુંતલા – તદ્યદિ વામનુમતં તથા વર્તેથાં યથા તસ્ય
રાજર્ષેરનુકમ્પનીયા ભવામિ । અન્યથાવશ્યં સિઞ્ચત મે તિલોદકમ્ ।
રાજાઃ – સંશયચ્છેદિ વચનમ્ ।
પ્રિયંવદા – ( જનાન્તિકમ્ )
અનસૂયે દૂરગતમન્મથાઽક્ષમેયં કાલહરણસ્ય । યસ્મિન્બદ્ધભાવૈષા
સ લલામભૂતઃ પૌરવાણામ્ । તદ્યુક્તમસ્યા અભિલાષોઽભિનન્દિતુમ્ ।
અનસૂયા – તથા યથા ભણસિ ।
પ્રિયંવદા – ( પ્રકાશમ્ )
સખિ દિષ્ટ્યાનુરૂપસ્તેઽભિનિવેશઃ । સાગરમુજ્ઝિત્વા કુત્ર વા
મહાનદ્યવતરતિ । ક ઇદાનીં સહકારમન્તરેણાતિમુક્તલતાં પલ્લવિતાં
સહતે ।
રાજાઃ – કિમત્ર ચિત્રં યદિ વિશાખે શશાઙ્કલેખામનુવર્તેતે ।
અનસૂયા – કઃ પુનરુપાયો ભવેદ્યેનાવિલમ્બિતં નિભૃતં ચ સખ્યા
મનોરથં સમ્પાદયાવઃ ।
પ્રિયંવદા – નિભૃતમિતિ ચિન્તનીયં ભવેત્ । શીઘ્રમિતિ સુકરમ્ ।

અનસૂયા – કથમિવ ।
પ્રિયંવદા – નનુ સ રાજર્ષિરસ્યાં સ્નિગ્ધદૃષ્ટ્યા
સૂચિતાભિલાષ એતાન્દિવસાન્પ્રજાગરકૃશો લક્ષ્યતે ।
રાજાઃ – સત્યમિત્થમ્ભૂત એવાસ્મિ । તથા હિ
ઇદમશિશિરૈરન્તસ્તાપાદ્વિવર્ણમણીકૃતં
નિશિ નિશિ ભુજન્યસ્તાપાઙ્ગપ્રસારિભિરશ્રુભિઃ ।
અનભિલુલિતજ્યાઘાતાઙ્કં મુહુર્મણિબન્ધનાત્કનકવલયં
સ્રસ્તં સ્રસ્તં મયા પ્રતિસાર્યતે ॥ ૧૧॥

પ્રિયંવદા – ( વિચિન્ત્ય )
હલા મદનલેખોઽસ્ય ક્રિયતામ્ તં સુમનોગોપિતં કૃત્વા
દેવપ્રસાદસ્યાપદેશેન તસ્ય હસ્તં પ્રાપયિષ્યામિ ।
અનસૂયા – રોચતે મે સુકુમારઃ પ્રયોગઃ કિં વા શકુંતલા ભણતિ ।

શકુંતલા – કિં નિયોગો વાં વિકલ્પ્યતે ।
પ્રિયંવદા – તેન હ્યાત્મન ઉપન્યાસપૂર્વં ચિન્તય તાવત્કિમપિ
લલિતપદબન્ધનમ્ ।
શકુંતલા – હલા ચિન્તયામ્યહમ્ । અવધીરણાભીરુકં પુનર્વેપતે
મે હૃદયમ્ ।
રાજાઃ – ( સહર્ષમ્ )
અયં સ તે તિષ્ઠતિ સંગમોત્સુકો
વિશઙ્કસે ભીરુ યતોऽવધીરણામ્ ।
લભેત વા પ્રાર્થયિતા ન વા શ્રિયં
શ્રિયા દુરાપઃ કથમીપ્સિતો ભવેત્ ॥ ૧૨॥

સખ્યૌ – અયિ આત્મગુણાવમાનિનિ ક ઇદાનીં શરીરનિર્વાપયિત્રીં
શારદીં જ્યોત્સ્નાં પટાન્તેન વારયતિ ।
શકુંતલા – ( સસ્મિતમ્ )
નિયોજિતેદાનીમસ્મિ ।
( ઇત્યુપવિષ્ટા ચિન્તયતિ )
રાજાઃ – સ્થાને ખલુ વિસ્મૃતનિમેષેણ ચક્ષુષા પ્રિયામવલોકયામિ ।
યતઃ
ઉન્નમિતૈ કભ્રૂલતમાનનમસ્યાઃ પદાનિ રચયન્ત્યાઃ ।
કણ્ટકિતેન પ્રથયતિ મય્યનુરાગં કપોલેન ॥ ૧૩॥

શકુંતલા – હલા ચિન્તિતં મયા ગીતવસ્તુ । અસંનિહિતાનિ
પુનર્લેખનસાધનાનિ ।
પ્રિયંવદા – એતસ્મિઞ્શુકોદરસુકુમારે નલિનીપત્રે નખૈર્નિક્ષિપ્તવર્ણં
કુરુ ।
શકુંતલા – ( યથોક્તં રૂપયિત્વા )
હલા શૃણુતમિદાનીં સઙ્ગતાર્થં ન વેતિ ।
ઉભે – અવહિતે સ્વઃ ।
શકુંતલા – ( વાચયતિ )
તવ ન જાને હૃદયં મમ પુનઃ કામો દિવાऽપિ રાત્રાવપિ ।
નિર્ઘૃણ તપતિ બલીયસ્ત્વયિ વૃત્તમનોરથાયા અઙ્ગાનિ ॥ ૧૪॥

રાજાઃ – ( સહસોપસૃત્ય )
તપતિ તનુગાત્રિ મદનસ્ત્વામનિશં માં પુનર્દહત્યેવ ।

ગ્લપયતિ યથા શશાઙ્કં ન તથા હિ કુમુદ્વતીં દિવસઃ ॥ ૧૫॥

સખ્યૌ – ( વિલોક્ય સહર્ષમુત્થાય )
સ્વાગતમવિલમ્બિનો મનોરથસ્ય ।
( શકુંતલાઽભ્યુત્થાતુમિચ્છતિ )
રાજાઃ – અલમલમાયાસેન ।
સંદષ્ટકુસુમશયનાન્યાશુક્લાન્તબિસભઙ્ગસુરભીણિ ।
ગુરુપરિતાપાનિ ન તે ગાત્રાણ્યુપચારમર્હન્તિ ॥ ૧૬॥

અનસૂયા – ઇતઃ શિલાતલૈકદેશમલંકરોતુ વયસ્યઃ ।
( રાજોપવિશતિ । શકુંતલા સલજ્જા તિષ્ઠતિ )
પ્રિયંવદા – દ્વયોરપિ યુવયોરન્યોન્યાનુરાગઃ પ્રત્યક્ષઃ । સખીસ્નેહઃ
પુનર્માં પુનરુક્તવાદિનીં કરોતિ ।
રાજાઃ – ભદ્રે નૈતત્પરિહાર્યમ્ । વિવક્ષિતં હ્યનુક્તમનુતાપં જનયતિ
।
પ્રિયંવદા – આપન્નસ્ય વિષયનિવાસિનો જનસ્યાર્તિહરેણ રાજ્ઞા
ભવિતવ્યમિત્યેષ વો ધર્મઃ ।
રાજાઃ – નાસ્માત્પરમ્ ।
પ્રિયંવદા – તેન હીયમાવયોઃ પ્રિયસખી ત્વામુદ્દિશ્યેદમવસ્થાન્તરં
ભગવતા મદનેનારોપિતા । તદર્હસ્યભ્યુપપત્ત્યા જીવિતમસ્યા
અવલમ્બિતુમ્ ।
રાજાઃ – ભદ્રે સાધારણોઽયં પ્રણયઃ । સર્વથાનુગૃહીતોઽસ્મિ ।
શકુંતલા – ( પ્રિયંવદામવલોક્યં )
હલા કિમન્તઃપુરવિરહપર્યુત્સુકસ્ય રાજર્ષેરુપરોધેન ।
રાજાઃ – સુન્દરિ
ઇદમનન્યપરાયણમન્યથા હૃદયસંનિહિતે હૃદયં મમ ।
યદિ સમર્થયસે મદિરેક્ષણે મદનબાણહતોઽસ્મિ હતઃ પુનઃ ॥ ૧૭॥

અનસૂયા – વયસ્ય બહુવલ્લભા રાજાનઃ શ્રૂયન્તે । યથા નૌ
પ્રિયસખી બન્ધુજનશોચનીયા ન ભવતિ તથા નિર્વાહય ।
રાજાઃ – ભદ્રે કિં બહુના
પરિગ્રહબહુત્વેઽપિ દ્વે પ્રતિષ્ઠે કુલસ્ય મે ।
સમુદ્રરસના ચોર્વી સખી ચ યુવયોરિયમ્ ॥ ૧૮॥

ઉભે – નિર્વૃતે સ્વઃ ।
પ્રિયંવદા – ( સદૃષ્ટિક્ષેપમ્ )
અનસૂયે એષ ઇતોદત્તદૃષ્ટિરુત્સુકો મૃગપોતકો માતરમન્વિષ્યતિ । એહિ
। સંયોજયાવ એનમ્ ।
( ઇત્યુભે પ્રસ્થિતે )
શકુંતલા – હલા અશરણાસ્મિ । અન્યતરા યુવયોરાગચ્છતુ ।
ઉભે – પૃથિવ્યા યઃ શરણં સ તવ સમીપે વર્તતે ।
( ઇતિ નિષ્ક્રાન્તે )
શકુંતલા – કથં ગતે એવ ।
રાજાઃ – અલમાવેગેન । નન્વયમારાધયિતા જનસ્તવ સમીપે વર્તતે ।
કિં શીતલૈઃ ક્લમવિનોદિભિરાર્દ્રવાતાન્સઞ્ચારયામિ
નલિનીદલતાલવૃન્તૈઃ ।
અઙ્કે નિધાય કરભોરુ યથાસુખં તે સંવાહયામિ ચરણાવુત પદ્મતામ્રૌ
॥ ૧૯॥

શકુંતલા – ન માનનીયેષ્વાત્માનમપરાધયિષ્યે ।
( ઇત્યુત્થાય ગન્તુમિચ્છતિ )
રાજાઃ – સુન્દરિ અનિર્વાણો દિવસઃ ઇયં ચ તે શરીરાવસ્થા ।
ઉત્સૃજ્ય કુસુમશયનં નલિનીદલકલ્પિતસ્તનાવરણમ્ ।
કથમાતપે ગમિષ્યસિ પરિબાધાપેલવૈરઙ્ગૈઃ ॥ ૨૦॥

( ઇતિ બલાદેનાં નિવર્તયતિ )
શકુંતલા – પૌરવ રક્ષ વિનયમ્ । મદનસંતપ્તાપિ ન ખલ્વાત્મનઃ
પ્રભવામિ ।
રાજાઃ – ભીરુ અલં ગુરૂજનભયેન । દૃષ્ટ્વા તે વિદિતધર્મા
તત્રભવાન્નાત્ર દોષં ગ્રહીષ્યતિ કુલપતિઃ । પશ્ય ।
ગાન્ધર્વેણ વિવાહેન બહવ્યો રાજર્ષિકન્યકાઃ ।
શ્રૂયન્તે પરિણીતાસ્તાઃ પિતૃભિશ્ચાભિનન્દિતાઃ ॥ ૨૧॥

શકુંતલા – મુઞ્ચ તાવન્મામ્ । ભૂયોઽપિ સખીજનમનુમાનયિષ્યે
।
રાજાઃ – ભવતુ । મોક્ષ્યામિ ।
શકુંતલા – કદા ।
રાજાઃ –

અપરિક્ષતકોમલસ્ય યાવત્કુસુમસ્યેવ નવસ્ય ષટ્પદેન ।
અધરસ્ય પિપાસતા મયા તે સદયં સુન્દરિ ગૃહ્યતે રસોઽસ્ય ॥ ૨૨॥

( ઇતિ મુખમસ્યાઃ સમુન્નમયિતુમિચ્છતિ । શકુંતલા પરિહરતિ નાટ્યેન )
( નેપથ્યે )
ચક્રવાકવધુકે આમન્ત્રયસ્વ સહચરમ્ । ઉપસ્થિતા રજની ।
શકુંતલા – ( સસમ્ભ્રમમ્ )
પૌરવ અસંશયં મમ શરીરવૃત્તાન્તોપલમ્ભાયાર્યા ગૌતમીત
એવાગચ્છતિ । તદ્વિટપાન્તરિતો ભવ ।
રાજાઃ – તથા ।
( ઇત્યાત્માનમાવૃત્ય તિષ્ઠતિ )
( તતઃ પ્રવિશતિ પાત્રહસ્તા ગૌતમી સખ્યૌ ચ )
સખ્યૌ – ઇત ઇત આર્યા ગૌતમી ।
ગૌતમી – ( શકુંતલામુપેત્ય )
જાતે અપિ લઘુસંતાપાનિ તેઽઙ્ગાનિ ।
શકુંતલા – આર્યે અસ્તિ મે વિશેષઃ ।
ગૌતમી – અનેન દર્ભોદકેન નિરાબાધમેવ તે શરીરં ભવિષ્યતિ ।
( શિરસિ શકુતલામભ્યુક્ષ્ય )
વત્સે પરિણતો દિવસઃ । એહિ ઉટજમેવ ગચ્છામઃ ।
( ઇતિ પ્રસ્થિતાઃ )
શકુંતલા – ( આત્મગતમ્ )
હૃદય પ્રથમમેવ સુખોપનતે મનોરથે કાતરભાવં ન મુઞ્ચસિ ।
સાનુશયવિઘટિતસ્ય કથં તે સામ્પ્રતં સંતાપઃ ।
( પદાન્તરે સ્થિત્વા । પ્રકાશમ્ )
લતાવલય સંતાપહારક આમન્ત્રયે ત્વાં ભૂયોઽપિ પરિભોગાય ।
( ઇતિ દુઃખેન નિષ્ક્રાન્તા શકુંતલા સહેતરાભિઃ )
રાજા ( પૂર્વસ્થાનમુપેત્ય । સનિઃશ્વાસમ્ )
અહો વિઘ્નવત્યઃ પ્રાર્થિતાર્થસિદ્ધયઃ । મયા હિ
મુહુરઙ્ગુલિસંવૃતાધરોષ્ઠં પ્રતિષેધાક્ષરવિક્લવાભિરામમ્ ।
મુખમંસવિવર્તિ પક્ષ્મલાક્ષ્યાઃ કથમપ્યુન્નમિતં ન ચુમ્બિતં તુ ॥ ૨૩॥

ક્વ નુ ખલુ સમ્પ્રતિ ગચ્છામિ । અથ વા ઇહૈવ પ્રિયાપરિભુક્તમુક્તે
લતાવલયે મુહૂર્તં સ્થાસ્યામિ ।

( સર્વતોઽવલોક્ય )
તસ્યાઃ પુષ્પમયી શરીરલુલિતા શય્યા શિલાયામિયં
ક્લાન્તો મન્મથલેખ એષ નલિનીપત્રે નખૈરર્પિતઃ ।
હસ્તાદ્ભ્રષ્ટમિદં બિસાભરણમિત્યાસજ્યમાનેક્ષણો
નિર્ગન્તું સહસા ન વેતસગૃહાચ્છક્નોમિ શૂન્યાદપિ ॥ ૨૪॥

( આકાશે )
રાજન્
સાયંતને સવનકર્મણિ સમ્પ્રવૃત્તે
વેદિં હુતાશનવતીં પરિતઃ પ્રયસ્તાઃ ।
છાયાશ્ચરન્તિ બહુધા ભયમાદધાનાઃ
સંધ્યાપયોદકપિશાઃ પિશિતાશનાનામ્ ॥ ૨૫॥

રાજાઃ – અયમહમાગચ્છામિ ।
( ઇતિ નિષ્ક્રાન્તઃ )

( ઇતિ તૃતીયોઽઙ્કઃ । )

ચતુર્થોઽઙ્કઃ ।

( તતઃ પ્રવિશતઃ કુસુમાવચયં નાટયન્ત્યૌ સખ્યૌ । )
અનસૂયા – હલા પ્રિયંવદે યદ્યપિ ગાન્ધર્વેણ વિધિના નિર્વૃત્તકલ્યાણા શકુંતલાઽનુરૂપભર્તૃગામિની સંવૃત્તેતિ નિર્વૃતં મે હૃદયં તથાપ્યેતાવચ્ચિન્તનીયમ્ ।
પ્રિયંવદા – કથમિવ ।
અનસૂયા – અદ્ય સ રાજર્ષિરિષ્ટિં પરિસમાપ્યર્ષિભિર્વિસર્જિત આત્મનો નગરં પ્રવિશ્યાન્તઃપુરસમાગત ઇતોગતં વૃત્તાન્તં સ્મરતિ વા ન વેતિ ।
પ્રિયંવદા – વિસ્રબ્ધા ભવ । ન તાદૃશા આકૃતિવિશેષા ગુણવિરોધિનો ભવન્તિ । તાત ઇદાનીમિમં ઋત્તાન્તં શ્રુત્વા ન જાને કિં પ્રતિપત્સ્યત ઇતિ ।
અનસૂયા – યથાહં પશ્યામિ તથા તસ્યાનુમતં ભવેત્ ।
પ્રિયંવદા – કથમિવ ।
અનસૂયા – ગુણવતે કન્યકા પ્રતિપાદનીયેત્યયં તાવત્પ્રથમઃ સંકલ્પઃ । તં યદિ દૈવમેવ સમ્પાદયતિ નન્વપ્રયાસેન કૃતાર્થો

ગુરુજનઃ ।

પ્રિયંવદા – ( પુષ્પભાજનં વિલોક્ય )

સખિ અવચિતાનિ બલિકર્મપર્યાપ્તાનિ કુસુમાનિ ।

અનસૂયા – નનુ સખ્યાઃ શકુંતલાયાઃ સૌભાગ્યદેવતાર્ચનીયા ।

પ્રિયંવદા – યુજ્યતે ।

( ઇતિ તદેવ કર્માભિનયતઃ )

( નેપથ્યે )

અયમહં ભોઃ ।

અનસૂયા – ( કર્ણં દત્ત્વા )

સખિ અતિથીનામિવ નિવેદિતમ્ ।

પ્રિયંવદા – નનૂટજસન્નિહિતા શકુંતલા ।

અનસુયા – અદ્ય પુનર્હૃદયેનાસન્નિહિતા । અલમેતાવદ્ભિઃ કુસુમૈઃ ।

( ઇતિ પ્રસ્થિતે )

( નેપથ્યે )

આઃ

અતિથિપરિભાવિનિ વિચિન્તયન્તી યમનન્યમાનસા તપોધનં વેત્સિ ન

મામુપસ્થિતમ્ ।

સ્મરિષ્યતિ ત્વાં ન સ બોધિતોઽપિ સન્કથાં પ્રમત્તઃ પ્રથમં કૃતામિવ

॥ ૧॥

પ્રિયંવદા – હા ધિક્ હા ધિક્ । અપ્રિયમેવ સંવૃત્તમ્ । કસ્મિન્નપિ

પૂજાર્હેઽપરાદ્ધા શૂન્યહૃદયા શકુંતલા ।

( પુરોઽવલોક્ય )

ન ખલુ યસ્મિન્કસ્મિન્નપિ । એષ દુર્વાસાઃ સુલભકોપો મહર્ષિઃ । તથા

શપ્ત્વા વેગબલોત્ફુલ્લયા દુર્વારયા ગત્યા પ્રતિનિવૃત્તઃ ।

અનસૂયા – કોઽન્યો હુતવહાદ્દગ્ધું પ્રભવતિ । ગચ્છ । પાદયોઃ

પ્રણમ્ય નિવર્તયૈનં યાવદહમર્ઘોદકમુપકલ્પયામિ ।

પ્રિયંવદા – તથા

( ઇતિ નિષ્ક્રાન્તા )

અનસૂયા – ( પદાન્તરે સ્ખલિતં નિરૂપ્ય )

અહો આવેગસ્ખલિતયા ગત્યા પ્રભ્રષ્ટં મમાગ્રહસ્તાત્પુષ્પભાજનમ્

।

( ઇતિ પુષ્પોચ્ચયં રૂપયતિ )
( પ્રવિશ્ય )
પ્રિયંવદા – સખિ પ્રકૃતિવક્રઃ સ કસ્યાનુનયં પ્રતિગૃહ્ણાતિ ।
કિમપિ પુનઃ સાનુક્રોશઃ કૃતઃ ।
અનસૂયા – ( સસ્મિતમ્ )
તસ્મિન્બહવેતદપિ । કથય ।
પ્રિયંવદા – યદા નિવર્તિતું નેચ્છતિ તદા વિજ્ઞાપિતો મયા ।
ભગવન્ પ્રથમ ઇતિ પ્રેક્ષ્યાવિજ્ઞાતતપઃપ્રભાવસ્ય દુહિતૃજનસ્ય
ભગવતૈકોઽપરાધો મર્ષયિતવ્ય ઇતિ ।
અનસૂયા – તતસ્તતઃ ।
પ્રિયંવદા – તતો ન મે વચનમન્યથાભવિતુમર્હતિ કિં
ત્વભિજ્ઞાનાભરણદર્શનેન શાપો નિવર્તિષ્યત ઇતિ મન્ત્રયમાણ
એવાન્તર્હિતઃ ।
અનસૂયા – શક્યમિદાનીમાશ્વસિતુમ્ । અસ્તિ તેન રાજર્ષિણા
સમ્પ્રસ્થિતેન સ્વનામધેયાઙ્કિતમઙ્ગુલીયકં સ્મરણીયમિતિ સ્વયં
પિનદ્ધમ્ । તસ્મિન્સ્વાધીનોપાયા શકુંતલા ભવિષ્યતિ ।
પ્રિયંવદા – સખિ એહિ । દેવકાર્યં તાવદસ્યા નિર્વર્તયાવઃ ।
( ઇતિ પરિક્રામતઃ )
પ્રિયંવદા – ( વિલોક્ય )
અનસૂયે પશ્ય તાવત્ । વામહસ્તોપહિતવદનાઽઽલિખિતેવ પ્રિયસખી ।
ભર્તૃગતયા ચિન્તયાત્માનમપિ નૈષા વિભાવયતિ । કિં
પુનરાગન્તુકમ્ ।
અનસૂયા – પ્રિયંવદે દ્વયોરેવ નૌ મુખે એષ વૃત્તાન્તસ્તિષ્ઠતુ ।
રક્ષિતવ્યા ખલુ પ્રકૃતિપેલવા પ્રિયસખી ।
પ્રિયંવદા – કો નામોષ્ણોદકેન નવમાલિકાં સિઞ્ચતિ ।
( ઇતિ નિષ્ક્રાન્તે )
વિષ્કમ્ભકઃ ।
( તતઃ પ્રવિશતિ સુપ્તોત્થિતઃ શિષ્યઃ )
શિષ્યઃ – વેલોપલક્ષણાર્થમાદિષ્ટોઽસ્મિ તત્રભવતા
પ્રવાસાદુપાવૃત્તેન કાશ્યપેન । પ્રકાશં નિર્ગતસ્તાવદવલોકયામિ
કિયદવશિષ્ટં રજન્યા ઇતિ ।
( પરિક્રમ્યાવલોક્ય ચ )

હન્ત પ્રભાતમ્ । તથા હિ ।
યાત્યેકતોઽસ્તશિખરં પતિરોષધીનામાવિષ્કૃતારુણપુરઃસર
એકતોઽર્કઃ ।
તેજોદ્વયસ્ય યુગપદ્વ્યસનોદયાભ્યાં લોકો નિયમ્યત ઇવાત્મદશાન્તરેષુ ॥
૨ ॥
અપિ ચ ।
અન્તર્હિતે શશિનિ સૈવ કુમુદ્વતી મે
વૃષ્ટિં ન નન્દયતિ સંસ્મરણીયશોભા ।
ઇષ્ટપ્રવાસજનિતાન્યબલાજનસ્ય
દુઃખાનિ નૂનમતિમાત્રસુદુઃસહાનિ ॥ ૩॥

( પ્રવિશ્યાપટીક્ષેપેણ )
અનસૂયા – યદ્યપિ નામ વિષયપરાઙ્મુખસ્ય જનસ્યૈતન્ન વિદિતં
તથાપિ તેન રાજ્ઞા હકુંતલાયામનાર્યમાચરિતમ્ ।
શિષ્યઃ – યાવદુપસ્થિતાં હોમવેલાં ગુરવે નિવેદયામિ ।
( ઇતિ નિષ્ક્રાન્તઃ )
અનસૂયા – પ્રતિબુદ્ધાપિ કિં કરિષ્યામિ । ન મ ઉચિતેષ્વપિ
નિજકરણીયેષુ હસ્તપાદં પ્રસરતિ । કામ ઇદાનીં સકામો ભવતુ
યેનાસત્યસંધે જને શુદ્ધહૃદયા સખી પદં કારિતા । અથ વા
દુર્વાસઃશાપ એષ વિકારયતિ । અન્યથા કથં સ રાજર્ષિસ્તાદૃશાનિ
મન્ત્રયિત્વૈતાવતઃ કાલસ્ય લેખમાત્રમપિ ન વિસૃજતિ ।
તદિતોઽભિજ્ઞાનમઙ્ગુલીયકં તસ્ય વિસૃજાવઃ । દુઃખશીલે તપસ્વિજને
કોઽભ્યર્થ્યતામ્ । નનુ સખીગામી દોષ
ઇતિ વ્યવસિતાપિ ન પારયામિ પ્રવાસપ્રતિનિવૃત્તસ્ય તાતકાશ્યપસ્ય
દુષ્યન્તપરિણીતામાપન્નસત્ત્વાં શકુંતલાં નિવેદયિતુમ્ ।
ઇત્થઙ્ગતેઽસ્માભિઃ કિં કરણીયમ્ ।
( પ્રવિશ્ય )
પ્રિયંવદા – ( સહર્ષમ્ )
સખિ ત્વરસ્વ ત્વરસ્વ શકુંતલાયાઃ પ્રસ્થાનકૌતુકં નિવર્તયિતુમ્ ।
અનસૂયા – સખિ કથમેતત્ ।
પ્રિયંવદા – શ◌ૃણુ । ઇદાનીં સુખશયિતપૃચ્છિકા
શકુંતલાસકાશં ગતાસ્મિ ।

અનસૂયા – તતસ્તતઃ ।
પ્રિયંવદા – તાવદેનાં લજ્જાવનતમુખીં પરિષ્વજ્ય
તાતકાશ્યપેનૈવમભિનન્દિતમ્ । દિષ્ટ્યા ધૂમાકુલિતદૃષ્ટેરપિ
યજમાનસ્ય પાવક એવાહુતિઃ પતિતા । વત્સે સુશિષ્યપરિદત્તા
વિદ્યેવશોચનીયાસિ સંવૃત્તા । અદ્યૈવ ઋષિરક્ષિતાં ત્વાં ભર્તુઃ
સકાશં વિસર્જયામીતિ ।
અનસૂયા – અથ કેન સૂચિતસ્તાતકાશ્યપસ્ય વૃત્તાન્તઃ ।
પ્રિયંવદા – અગ્નિશરણં પ્રવિષ્ટસ્ય શરીરં વિના છન્દોમય્યા
વાણ્યા ।
અનસૂયા – ( સવિસ્મયમ્ ) કથમિવ ।
પ્રિયંવદા – ( સંસ્કૃતમાશ્રિત્ય )
દુષ્યન્તેનાહિતં તેજો દધાનાં ભૂતયે ભુવઃ ।
અવેહિ તનયાં બ્રહ્મન્નગ્નિગર્ભાં શમીમિવ ॥ ૪॥

અનસૂયા – ( પ્રિયંવદામાશ્લિષ્ય )
સખિ પ્રિયં મે । કિં ત્વદ્યૈવ શકુંતલા નીયત ઇત્યુત્કણ્ઠાસાધારણં
પરિતોષમનુભવામિ ।
પ્રિયંવદા – સખિ આવાં તાવદુત્કણ્ઠાં વિનોદયિષ્યાવઃ । સા
તપસ્વિની નિર્વૃતા ભવતુ ।
અનસૂયા – તેન હ્યેતસ્મિંશ્ચૂતશાખાવલમ્બિતે નાલિકેરસમુદ્ગક
એતન્નિમિત્તમેવ કાલાન્તરક્ષમા નિક્ષિપ્તા મયા કેસરમાલિકા । તદિમાં
હસ્તસન્નિહિતાં કુરુ । યાવદહમપિ તસ્યૈ મૃગરોચનાં તીર્થમૃત્તિકાં
દૂર્વાકિસલયાનીતિ મઙ્ગલસમાલમ્ભનાનિ વિરચયામિ ।
પ્રિયંવદા – તથા ક્રિયતામ્ ।
( અનસૂયા નિષ્ક્રાન્તા । પ્રિયંવદા નાટ્યેન સુમનસો ગૃહ્ણાતિ )
( નેપથ્યે )
ગૌતમિ આદિશ્યન્તાં શાર્ઙ્ગરવમિશ્રાઃ શકુંતલાનયનાય ।
પ્રિયંવદા – ( કર્ણં દત્ત્વા )
અનસૂયે ત્વરસ્વ ત્વરસ્વ । એતે ખલુ હસ્તિનાપુરગામિન ઋષયઃ
શબ્દાય્યન્તે ।
( પ્રવિશ્ય સમાલમ્ભનહસ્તા )
અનસૂયા – સખિ એહિ । ગચ્છાવઃ ।

( ઇતિ પરિક્રામતઃ )
પ્રિયંવદા – ( વિલોક્ય )
એષા સૂર્યોદય એવ શિખામજ્જિતા પ્રતીષ્ટનીવારહસ્તાભિઃ
સ્વસ્તિવાચનિકાભિસ્તાપસીભિરભિનન્ધમાના શકુંતલા તિષ્ઠતિ ।
ઉપસર્પાવ એનામ્ ।
( ઇત્યુપસર્પતઃ )
( તતઃ પ્રવિશતિ યથોદ્દિષ્ટવ્યાપારા આસનસ્થા શકુંતલા )
તાપસીનામન્યતમા – ( શકુંતલાં પ્રતિ )
જાતે ભર્તુર્બહુમાનસૂચકં મહાદેવીશબ્દં લભસ્વ ।
દ્વિતીયા – વત્સે વીરપ્રસવિની ભવ ।
તૃતીયા – વત્સે ભર્તુર્બહુમતા ભવ ।
( ઇત્યાશિષો દત્ત્વા ગૌતમીવર્જં નિષ્ક્રાન્તાઃ )
સખ્યૌ – ( ઉપસૃત્ય )
સખિ સુખમજ્જનં તે ભવતુ ।
શકુંતલા – સ્વાગતં મે સખ્યોઃ । ઇતો નિષીદતમ્ ।
ઉભે ( મઙ્ગલપાત્રાણ્યાદાય । ઉપવિશ્ય )
હલા સજ્જા ભવ । યાવત્તે મઙ્ગલસમાલમ્ભનં વિરચયાવઃ ।
શકુંતલા – ઇદમપિ બહુ મન્તવ્યમ્ । દુર્લભમિદાનીં મે
સખીમણ્ડનં ભવિષ્યતિ ।
( ઇતિ બાષ્પં વિસૃજતિ )
ઉભે – સખિ ઉચિતં ન તે મઙ્ગલકાલે રોદિતુમ્ ।
(ઇત્યશ્રૂણિ પ્રમૃજ્ય નાટ્યેન પ્રસાધયતઃ)
પ્રિયંવદા – આભરણોચિતં રૂપમાશ્રમસુલભૈઃ
પ્રસાધનૈર્વિપ્રકાર્યતે ।
( પ્રવિશ્યોપાયનહસ્તાવૃષિકુમારકૌ )
ઉભૌ – ઇદમલંકરણમ્ । અલંક્રિયતામત્રભવતી ।
( સર્વા વિલોક્ય વિસ્મિતાઃ )
ગૌતમી – વત્સ નારદ કુત એતત્ ।
પ્રથમઃ – તાતકાશ્યપપ્રભાવાત્ ।
ગૌતમી – કિં માનસી સિદ્ધિઃ ।
દ્વિતીયઃ – ન ખલુ । શ્રૂયતામ્ । તત્રભવતા વયમાજ્ઞપ્તાઃ
શકુંતલાહેતોર્વનસ્પતિભ્યઃ કુસુમાન્યાહરતેતિ ।

તત ઇદાનીં
ક્ષૌમં કેનચિદિન્દુપાણ્ડુ તરુણા માઙ્ગલ્યમાવિષ્કૃતં
નિષ્ઠ્યૂતશ્ચરણોપભોગસુલભો લાક્ષારસઃ કેનચિત્ ।
અન્યેભ્યો વનદેવતાકરતલૈરાપર્વભાગોત્થિતૈ-
ર્દત્તાન્યાભરણાનિ તત્કિસલયોદ્ભેદપ્રતિદ્વન્દ્વિભિઃ ॥ ૫॥

પ્રિયંવદા – ( શકુંતલાં વિલોક્ય )
હલા અનયાભ્યુપપત્ત્યા સૂચિતા તે ભર્તુર્ગેહેઽનુભવિતવ્યા રાજલક્ષ્મીઃ
।
( શકુંતલા વ્રીડાં રૂપયતિ )
પ્રથમ – ગૌતમ એહ્યેહિ । અભિષેકોત્તીર્ણાય કાશ્યપાય
વનસ્પતિસેવાં નિવેદયાવઃ ।
દ્વિતીયઃ – તથા ।
( ઇતિ નિષ્ક્રાન્તૌ )
સખ્યૌ – અયે અનુપયુક્તભૂષણોઽયં જનઃ ।
ચિત્રકર્મપરિચયેનાઙ્ગેષુ ત આભરણવિનિયોગં કુર્વઃ ।
શકુંતલા – જાને વાં નૈપુણમ્ ।
( ઉભે નાટ્યેનાલઙ્કુરૂતઃ )
( તતઃ પ્રવિશતિ સ્નાનોત્તીર્ણઃ કાશ્યપઃ ) ।
કાશ્યપઃ – યાસ્યત્યદ્ય શકુન્તલેતિ હૃદયં સંસ્પૃષ્ટમુત્કણ્ઠયા
કણ્ઠઃ સ્તમ્ભિતબાષ્પવૃત્તિકલુષશ્ચિન્તાજડં દર્શનમ્ ।
વૈક્લવ્યં મમ તાવદીદૃશમિદં સ્નેહાદરણ્યૌકસઃ
પીડ્યન્તે ગૃહિણઃ કથં નુ તનયાવિશ્લેષદુઃખૈર્નવૈઃ ॥ ૬॥

( ઇતિ પરિક્રામતિ )
સખ્યૌ – હલા શકુન્તલે અવસિતમણ્ડનાસિ । પરિધત્સ્વ સામ્પ્રતં
ક્ષૌમયુગલમ્ ।
( શકુન્તલોત્થાય પરિધત્તે )
ગૌતમી – જાતે એષ તે આનન્દપરિવાહિણા ચક્ષુષા પરિષ્વજમાન
ઇવ ગુરુરુપસ્થિતઃ । આચારં તાવત્પ્રતિપદ્યસ્વ ।
શકુંતલા – ( સવ્રીડમ્ )
તાત વન્દે ।
કાશ્યપઃ – વત્સે ।

યયાતેરિવ શર્મિષ્ઠા ભર્તુર્બહુમતા ભવ ।
સુતં ત્વમપિ સમ્રાજં સેવ પૂરુમવાપ્નુહિ ॥ ૭॥

ગૌતમી – ભગવાન્ વરઃ ખલ્વેષઃ । નાશીઃ ।
કાશ્યપઃ – વત્સે ઇતઃ સદ્યો હુતાનગ્નીન્પ્રદક્ષિણીકુરુષ્વ ।
( સર્વે પરિક્રામન્તિ )
કાશ્યપઃ – ( ઋક્છન્દસાઽઽશાસ્તે )
અમી વેદિં પરિતઃ ક્લૃપ્તધિષ્ણ્યાઃ
સમિદ્વન્તઃ પ્રાન્તસંસ્તીર્ણદર્ભાઃ ।
અપઘ્નતો દુરિતં હવ્યગન્ધૈર્વૈતાનાસ્ત્વાં
વહ્નયઃ પાવયંતુ ॥ ૮॥

પ્રતિષ્ઠસ્વેદાનીમ્ ।
( સદૃષ્ટિક્ષેપમ્ )
ક્વ તે શાર્ઙ્ગરવમિશ્રાઃ ।
( પ્રવિશ્ય )
શિષ્ય – ભગવન્ ઇમે સ્મઃ ।
કાશ્યપ – ભગિન્યાસ્તે માર્ગમાદેશય ।
શાર્ઙ્ગરવ – ઇત ઇતો ભવતી ।
( સર્વે પરિક્રામન્તિ )
કાશ્યપ – ભો ભોઃ સંનિહિતાસ્તપોવનતરવઃ ।
પાતું ન પ્રથમં વ્યવસ્યતિ જલં યુષ્માસ્વપીતેષુ યા
નાદત્તે પ્રિયમણ્ડનાપિ ભવતાં સ્નેહેન યા પલ્લવમ્ ।
આદ્યે વઃ કુસુમપ્રસૂતિસમયે યસ્યા ભવત્યુત્સવઃ
સેયં યાતિ શકુંતલા પતિગૃહં સર્વૈરનુજ્ઞાયતામ્ ॥ ૯॥

( કોકિલરવં સૂચયિત્વા )
અનુમતગમના શકુંતલા તરુભિરિયં વનવાસબન્ધુભિઃ ।
પરિભૃતવિરુતં કલં યથા પ્રતિવચનીકૃતમેભિરીદૃશમ્ ॥ ૧૦॥

( આકાશે )
રમ્યાન્તરઃ કમલિનીહરિતૈઃ
સરોભિશ્છાયાદ્રુમૈર્નિયમિતાર્કમયૂખતાપઃ ।
ભૂયાત્કુશેશયરજોમૃદુરેણુરસ્યાઃ શાન્તાનુકૂલપવનશ્ચ શિવશ્ચ

પન્થાઃ ॥ ૧૧॥

( સર્વે સવિસ્મયમાકર્ણયન્તિ )

ગૌતમી – જાતે જ્ઞાતિજનસ્નિગ્ધાભિરનુજ્ઞાતગમનાસિ
તપોવનદેવતાભિઃ । પ્રણમ ભગવતીઃ ।
શકુંતલા – ( સપ્રણામં પરિક્રમ્ય । જનાન્તિકમ્ )
હલા પ્રિયંવદે આર્યપુત્રદર્શનોત્સુકાયા અપ્યાશ્રમપદં પરિત્યજન્ત્યા
દુઃખેન મે ચરણૌ પુરતઃ પ્રવર્તેતે ।
પ્રિયંવદા – ન કેવલં તપોવનવિરહકાતરા સખ્યેવ ।
ત્વયોપસ્થિતવિયોગસ્ય તપોવનસ્યાપિ તાવત્સમવસ્થા દૃશ્યતે ।
ઉદ્ગલિતદર્ભકવલા મૃગ્યઃ પરિત્યક્તનર્તના મયૂરાઃ ।
અપસૃતપાણ્ડુપત્રા મુઞ્ચન્ત્યશ્રૂણીવ લતાઃ ॥ ૧૨॥

શકુંતલા – ( સ્મૃત્વા )
તાત લતાભગિનીં વનજ્યોત્સ્નાં તાવદામન્ત્રયિષ્યે ।
કાશ્યપઃ – અવૈમિ તે તસ્યાં સોદર્યાસ્નેહમ્ । ઇયં તાવદ્દક્ષિણેન ।
શકુંતલા – ( ઉપેત્ય લતામાલિઙ્ગ્ય )
વનજ્યોત્સ્ને ચૂતસંગતાપિ માં પ્રત્યાલિઙ્ગેતોગતાભિઃ શાખાબાહાભિઃ ।
અદ્યપ્રભૃતિ દૂરપરિવર્તિની તે ખલુ ભવિષ્યામિ ।
કાશ્યપઃ –
સંકલ્પિતં પ્રથમમેવ મયા તવાર્થે
ભર્તારમાત્મસદૃશં સુકૃતૈર્ગતા ત્વમ્ ।
ચૂતેન સંશ્રિતવતી નવમાલિકેયમસ્યામહં
ત્વયિ ચ સમ્પ્રતિ વીતચિન્તઃ ॥ ૧૩॥

ઇતઃ પન્થાનં પ્રતિપદ્યસ્વ ।
શકુંતલા – ( સખ્યૌ પ્રતિ )
હલા એષા દ્વયોર્યુવયોર્હસ્તે નિક્ષેપઃ ।
સખ્યૌ – અયં જનઃ કસ્ય હસ્તે સમર્પિતઃ ।
( ઇતિ બાષ્પં વિહરતઃ )
કાશ્યપઃ – અનસૂયે અલં રુદિત્વા । નનુ ભવતીભ્યામેવ
સ્થિરીકર્તવ્યા શકુંતલા ।
( સર્વે પરિક્રમન્તિ )
શકુંતલા – તાત એષોટજપર્યન્તચારિણી ગર્ભમન્થરા

મૃગવધૂર્યદાऽનઘપ્રસવા ભવતિ તદા મહ્યં કમપિ
પ્રિયનિવેદયિતૃકં વિસર્જયિષ્યથ ।
કાશ્યપઃ – નેદં વિસ્મરિષ્યામઃ ।
શકુંતલા – ( ગતિભઙ્ગં રૂપયિત્વા )
કો નુ ખલ્વેષ નિવસને મે સજ્જતે ।
( ઇતિ પરાવર્તતે )
કાશ્યપઃ – વત્સે,
યસ્ય ત્વયા વ્રણવિરોપણમિઙ્ગુદીનાં
તૈલં ન્યષિચ્યત મુખે કુશસુચિવિદ્ધે ।
શ્યામાકમુષ્ટિપરિવર્ધિતકો જહાતિ
સોऽયં ન પુત્રકૃતકઃ પદવીં મૃગસ્તે ॥ ૧૪॥

શકુંતલા – વત્સ કિં સહવાસપરિત્યાગિનીં મામનુસરસિ ।
અચિરપ્રસૂતયા જનન્યા વિના વર્ધિત એવ । ઇદાનીમપિ મયા વિરહિતં
ત્વાં તાતશ્ચિન્તયિષ્યતિ । નિવર્તસ્વ તાવત્ ।
( ઇતિ રુદતી પ્રસ્થિતા )
કાશ્યપઃ –
ઉત્પક્ષ્મણોર્નયનયોરુપરુદ્ધવૃત્તિં
બાષ્પં કુરુ સ્થિરતયા વિરતાનુબન્ધમ્ ।
અસ્મિન્નલક્ષિતનતોન્નતભૂમિભાગે
માર્ગે પદાનિ ખલુ તે વિષમીભવન્તિ ॥ ૧૫॥

શાર્ઙ્ગરવઃ – ભવગાન્ । ઓદકાન્તં સ્નિગ્ધો જનોऽનુગન્તવ્ય ઇતિ
શ્રૂયતે । તદિદં સરસ્તીરમ્ । અત્ર સંદિશ્ય પ્રતિગન્તુમર્હતિ ।
કાશ્યપઃ – તેન હીમાં ક્ષીરવૃક્ષછાયામાશ્રયામઃ ।
( સર્વે પરિક્રમ્ય સ્થિતાઃ )
કાશ્યપઃ – ( આત્મગતમ્ )
કિં નુ ખલુ તત્રભવતો દુષ્યન્તસ્ય યુક્તરૂપમસ્માભિઃ સંદેષ્ટવ્યમ્
।
( ઇતિ ચિન્તયતિ )
શકુંતલા – ( જનાન્તિકમ્ )
હલા પશ્ય । નલિનીપત્રાન્તરિતમપિ સહચરમપશ્યન્ત્યાતુરા
ચક્રવાક્યરટતિ દુષ્કરમહં કરોમીતિ ।

અનસૂયા – સખિ મૈવં મન્ત્રયસ્વ ।
એષાપિ પ્રિયેણ વિના ગમયતિ રજનીં વિષાદદીર્ઘતરામ્ ।
ગુર્વપિ વિરહદુઃખમાશાબન્ધઃ સાહયતિ ॥ ૧૬॥

કાશ્યપઃ – શાર્ઙ્ગરવ ઇતિ ત્વયા મદ્વચનાત્સ રાજા શકુંતલાં
પુરસ્કૃત્ય વક્તવ્યઃ ।
શાર્ઙ્ગરવઃ – આજ્ઞાપયતુ ભગવાન્ ।
કાશ્યપઃ – અસ્માન્સાધુ વિચિન્ત્ય સંયમધનાનુચ્ચૈઃ કુલં
ચાત્મનસ્ત્વય્યસ્યાઃ કથમપ્યબાન્ધવકૃતાં સ્નેહપ્રવૃત્તિં ચ તામ્ ।
સામાન્યપ્રતિપત્તિપૂર્વકમિયં દારેષુ દૃશ્યા ત્વયા
ભાગ્યાયત્તમતઃ પરં ન ખલુ તદ્વાચ્યં વધૂબન્ધુભિઃ ॥ ૧૭॥

શાર્ઙ્ગરવઃ – ગૃહીતઃ સંદેશઃ ।
કાશ્યપઃ – વત્સે ત્વમિદાનીમનુશાસનીયાસિ । વનૌકસોઽપિ સન્તો
લૌકિકજ્ઞા વયમ્ ।
શાર્ઙ્ગરવઃ – ન ખલુ ધીમતાં કશ્ચિદવિષયો નામ ।
કાશ્યપઃ – સા ત્વમિતઃ પતિકુલં પ્રાપ્ય –
શુશ્રૂષસ્વ ગુરૂન્કુરુ પ્રિયસખીવૃત્તિં સપત્નીજને
ભર્તૃર્વિપ્રકૃતાપિ રોષણતયા મા સ્મ પ્રતીપં ગમઃ ।
ભૂયિષ્ઠં ભવ દક્ષિણા પરિજને ભાગ્યેષ્વનુત્સેકિની
યાન્ત્યેવં ગૃહિણીપદં યુવતયો વામાઃ કુલસ્યાધયઃ ॥ ૧૮॥

અનસુયા – કથં વા ગૌતમી મન્યતે ।
ગૌતમી – એતાવાન્વધૂજનસ્યોપદેશઃ । જાતે એતત્ખલુ સર્વમવધારય
।
કાશ્યપઃ – વત્સે પરિષ્વજસ્વ માં સખીજનં ચ ।
શકુંતલા – તાત ઇત એવ કિં પ્રિયંવદાનુસૂયે સખ્યૌ નિવર્તિષ્યેતે ।
કાશ્યપ – વત્સે ઇમે અપિ પ્રદેયે । ન યુક્તમનયોસ્તત્ર ગન્તુમ્ । ત્વયા
સહ ગૌતમી યાસ્યતિ ।
શકુંતલા – ( પિતરમાશ્લિષ્ય )
કથમિદાનીં તાતસ્યાઙ્કાત્પરિભ્રષ્ટા મલયતટોન્મૂલિતા ચન્દનલતેવ
દેશાન્તરે જીવિતં ધારયિષ્યામિ ।
કાશ્યપઃ – વત્સે કિમેવં કાતરાસિ ।
અભિજનવતો ભર્તુઃ શ્લાઘ્યે સ્થિતા ગૃહિણીપદે

વિભવગુરુભિઃ કૃત્યૈસ્તસ્ય પ્રતિક્ષણમાકુલા ।
તનયમચિરાત્પ્રાચીવાર્કં પ્રસૂય ચ પાવનં
મમ વિરહજાં ન ત્વં વત્સે શુચં ગણયિષ્યસિ ॥ ૧૯॥

( શકુંતલા પિતુઃ પાદયોઃ પતતિ )
કાશ્યપઃ – યદિચ્છામિ તે તદસ્તુ ।
શકુંતલા – ( સખ્યાવુપેત્ય )
હલા દ્વે અપિ માં સમમેવ પરિષ્વજેથામ્ ।
સખ્યૌ – ( તથા કૃત્વા )
સખિ યદિ નામ સ રાજા પ્રત્યભિજ્ઞાનમન્થરો
ભવેત્તતસ્તસ્માયિદમાત્મનામધેયાઙ્કિતમઙ્ગુલીયકં દર્શય ।
શકુંતલા – અનેન સંદેહેન વામાકમ્પિતાસ્મિ ।
સખ્યૌ – મા ભૈષીઃ । અતિસ્નેહઃ પાપશઙ્કી ।
શાર્ઙ્ગરવઃ – યુગાન્તરમારૂઢઃ સવિતા । ત્વરતામત્રભવતી ।
શકુંતલા – ( આશ્રમાભિમુખી સ્થિત્વા )
તાત કદા નુ ભૂયસ્તપોવનં પ્રેક્ષિષ્યે ।
કાશ્યપ – શ્રૂયતામ્ ।
ભૂત્વા ચિરાય ચતુરન્તમહીસપત્ની
દૌષ્યન્તિમપ્રતિરથં તનયં નિવેશ્ય ।
ભર્ત્રા તદર્પિતકુટુમ્બભરેણ સાર્ધં
શાન્તે કરિષ્યસિ પદં પુનરાશ્રમેઽસ્મિન્ ॥ ૨૦॥

ગૌતમી – જાતે પરિહીયતે ગમનવેલા । નિવર્તય પિતરમ્ । અથ વા
ચિરેણાપિ પુનઃ પુનરેષૈવં મન્ત્રયિષ્યતે । નિવર્તતાં ભવાન્ ।
કાશ્યપઃ – વત્સે ઉપરુધ્યતે તપોઽનુષ્ઠાનમ્ ।
શકુંતલા – ( ભૂયઃ પિતરમાશ્લિષ્ય ) તપશ્ચરણપીડિતં
તાતશરીરમ્ । તન્માતિમાત્રં મમ કૃત ઉત્કણ્ઠસ્વ ।
કાશ્યપઃ – ( સનિઃશ્વાસમ્ )
શમમેષ્યતિ મમ શોકઃ કથં નુ વત્સે ત્વયા રચિતપૂર્વમ્ ।
ઉટજદ્વારવિરૂઢં નીવારબલિં વિલોકયતઃ ॥ ૨૧॥

ગચ્છ । શિવાસ્તે પન્થાનઃ સન્તુ ।
( નિષ્કાન્તા શકુંતલા સહયાયિનશ્ચ )
સખ્યૌ – ( શકુંતલાં વિલોક્ય )

હા ધિક્ હા ધિક્ । અન્તર્હિતા શકુંતલા વનરાજ્યા ।
કાશ્યપઃ – ( સનિઃશ્વાસમ્ )
અનસૂયે ગતવતી વાં સહચારિણી । નિગૃહ્ય શોકમનુગચ્છતં માં
પ્રસ્થિતમ્ ।
ઉભે – તાત શકુંતલાવિરહિતં શૂન્યમિવ તપોવનં કથં પ્રવિશાવઃ
।
કાશ્યપઃ – સ્નેહવૃત્તિરેવન્દર્શિની ।
( સવિમર્શં પરિક્રમ્ય )
હન્ત ભોઃ શકુંતલાં પતિકુલં વિસૃજ્ય લબ્ધમિદાનીં સ્વાસ્થ્યમ્ ।
કુતઃ ।
અર્થો હિ કન્યા પરકીય એવ તામદ્ય સમ્પ્રેષ્ય પરિગ્રહીતુઃ ।
જાતો મમાયં વિશદઃ પ્રકામં પ્રત્યર્પિતન્યાસ ઇવાન્તરાત્મા ॥ ૨૨॥

( ઇતિ નિષ્ક્રાન્તાઃ સર્વે )

( ઇતિ ચતુર્થોઽઙ્કઃ । )

પઞ્ચમોઽઙ્કઃ ।

( તતઃ પ્રવિશત્યાસનસ્થો રાજા વિદૂષકશ્ચ )
વિદુષકઃ – ( કર્ણં દત્ત્વા )
ભો વયસ્ય સંગીતશાલાન્તરેઽવધાનં દેહિ । કલવિશુદ્ધાયા ગીતેઃ
સ્વરસંયોગઃ શ્રૂયતે । જાને ત્રયભવતી હંસપદિકા વર્ણપરિચયં
કરોતીતિ ।
રાજાઃ – તૂષ્ણીં ભવ । યાવદાકર્ણયામિ ।
( આકાશે ગીયતે )
અભિનવમધુલોલુપસ્ત્વં તથા પરિચુમ્બ્ય ચૂતમઞ્જરીમ્ ।
કમલવસતિમાત્રનિર્વૃતો મધુકર વિસ્મૃતોઽસ્યેનાં કથમ્ ॥ ૧॥

રાજાઃ – અહો રાગપરિવાહિણી ગીતિઃ ।
વિદુષકઃ – કિં તાવદ્ગીત્યા અવગતોઽક્ષરાર્થઃ ।
રાજાઃ – ( સ્મિતં કૃત્વા )
સકૃત્કૃતપ્રણયોઽયં જનઃ । તદસ્યા દેવીં વસુમતીમન્તરેણ
મહદુપાલમ્ભનં ગતોઽસ્મિ । સખે માધવ્ય મદ્વચનાદુચ્યતાં
હંસપદિકા । નિપુણમુપાલબ્ધાઃ સ્મ ઇતિ ।

વિદુષકઃ – યદ્ભવાનાજ્ઞાપયતિ ।

( ઉત્થાય )

ભો વયસ્ય ગૃહીતસ્ય તયા પરકીયૈર્હસ્તૈઃ શિખણ્ડકે

તાડ્યમાનસ્યાપ્સરસા વીતરાગસ્યેવ નાસ્તીદાનીં મે મોક્ષઃ ।

રાજાઃ – ગચ્છ । નાગરિકવૃત્ત્યા સઞ્જ્ઞાપયૈનામ્ ।

વિદુષકઃ – કા ગતિઃ । ( ઇતિ નિષ્ક્રાન્તાઃ )

રાજાઃ – ( આત્મગતમ્ )

કિં નુ ખલુ ગીતમેવંવિધાર્થમાકર્ણ્યેષ્ટજનવિરહાદૃતેપિ

બલવદુત્કણ્ઠિતોઽસ્મિ । અથવા ।

રમ્યાણિ વીક્ષ્ય મધુરાંશ્ચ નિશમ્ય શબ્દાન્પર્યુત્સુકો ભવતિ

યત્સુખિતોઽપિ જન્તુઃ ।

તચ્ચેતસા સ્મરતિ નૂનમબોધપૂર્વં ભાવસ્થિરાણિ

જનનાન્તરસૌહૃદાનિ ॥ ૨॥

( ઇતિ પર્યાકુલસ્તિષ્ઠતિ )

( તતઃ પ્રવિશતિ કઞ્ચુકી )

કઞ્ચુકી – અહો નુ ખલ્વીદૃશીમવસ્થાં પ્રતિપન્નોઽસ્મિ ।

આચાર ઇત્યવહિતેન મયા ગૃહીતા

યા વેત્રયષ્ટિરવરોધગૃહેષુ રાજ્ઞઃ ।

કાલે ગતે બહુતિથે મમ સૈવ જાતા

પ્રસ્થાનવિક્લવગતેરવલમ્બનાર્થા ॥ ૩॥

ભોઃ કામં ધર્મકાર્યમનતિપાત્યં દેવસ્ય । તથાપીદાનીમેવ

ધર્માસનાદુત્થિતાય પુનરુપરોધકારિ કણ્વશિષ્યાગમનમસ્મૈ નોત્સહે

નિવેદયિતુમ્ । અથ વાઽવિશ્રમોઽયં લોકતન્ત્રાધિકારઃ । કુતઃ ।

ભાનુઃ સકૃદ્યુક્તતુરઙ્ગ એવ રાત્રિન્દિવં ગન્ધવહઃ પ્રયાતિ ।

શેષઃ સદૈવાહિતભૂમિભારઃ ષષ્ઠાંશવૃત્તેરપિ ધર્મ એષઃ ॥

૪ ॥

યાવન્નિયોગમનુતિષ્ઠામિ ।

( પરિક્રમ્યાવલોક્ય ચ )

એષ દેવઃ

પ્રજાઃ પ્રજાઃ સ્વા ઇવ તન્ત્રયિત્વા

નિષેવતે શ્રાન્તમના વિવિક્તમ્ ।

યૂથાનિ સંચાર્ય રવિપ્રતપ્તઃ
શીતં દિવા સ્થાનમિવ દ્વિપેન્દ્રઃ ॥ ૫॥

( ઉપગમ્ય )
જયતુ જયતુ દેવઃ । એતે ખલુ હિમગિરેરુપત્યકારણ્યવાસિનઃ
કાશ્યપસંદેશમાદાય સસ્ત્રીકાસ્તપસ્વિનઃ સમ્પ્રાપ્તાઃ । શ્રુત્વા દેવઃ
પ્રમાણમ્ ।
રાજાઃ – ( સાદરમ્ )
કિં કાશ્યપસંદેશહારિણઃ ।
કઞ્ચુકી – અથ કિમ્ ।
રાજાઃ – તેન હિ મદ્વચનાદ્વિજ્ઞાપ્યતામુપાધ્યાયઃ સોમરાતઃ ।
અમૂનાશ્રમવાસિનઃ શ્રૌતેન વિધિના સત્કૃત્ય સ્વયમેવ
પ્રવેશયિતુમર્હસીતિ । અહમપ્યત્ર તપસ્વિદર્શનોચિતે પ્રદેશે સ્થિતઃ
પ્રતિપાલયામિ ।
ક'ન્ચુકી – યદાજ્ઞાપયતિ દેવઃ ।
( ઇતિ નિષ્ક્રાન્તઃ )
રાજાઃ – ( ઉત્થાય )
વેત્રવતિ અગ્નિશરણમાર્ગમાદેશય ।
પ્રતિહારી – ઇત ઇતો દેવઃ ।
રાજાઃ – ( પરિક્રામતિ । અધિકારખેદં નિરૂપ્ય )
સર્વઃ પ્રાર્થિતમર્થમધિગમ્ય સુખી સમ્પદ્યતે જન્તુઃ । રાજ્ઞાં તુ
ચરિતાર્થતા દુઃખોત્તરૈવ ।
ઔત્સુક્યમાત્રમવસાયયતિ પ્રતિષ્ઠા
ક્લિશ્નાતિ લબ્ધપરિપાલનવૃત્તિરેવ ।
નાતિશ્રમાપનયનાય યથા શ્રમાય
રાજ્યં સ્વહસ્તધૃતદણ્ડમિવાતપત્રમ્ ॥ ૬॥

( નેપથ્યે )
વૈતાલિકૌ – વિજયતાં દેવઃ ।
પ્રથમઃ –
સ્વસુખનિરભિલાષઃ ખિદ્યસે લોકહેતોઃ
પ્રતિદિનમથવા તે વૃત્તિરેવંવિધૈવ ।
અનુભવતિ હિ મૂર્ધ્ના પદપસ્તીવ્રમુષ્ણં

શમયતિ પરિતાપં છાયયા સંશ્રિતાનામ્ ॥ ૭॥

દ્વિતીયઃ –
નિયમયસિ વિમાર્ગપ્રસ્થિતાનાત્તદણ્ડઃ
પ્રશમયસિ વિવાદં કલ્પસે રક્ષણાય ।
અતનુષુ વિભવેષુ જ્ઞાતયઃ સન્તુ નામ
ત્વયિ તુ પરિસમાપ્તં બન્ધુકૃત્યં પ્રજાનામ્ ॥ ૮॥

રાજાઃ – એતે ક્લાન્તમનસઃ પુનર્નવીકૃતાઃ સ્મઃ ।
( ઇતિ પરિક્રામતિ )
પ્રતિહારી – એષ અભિનવસમ્માર્જનસશ્રીકઃ
સન્નિહિતહોમધેનુરગ્નિશરણાલિન્દઃ । આરોહતુ દેવઃ ।
રાજાઃ – ( આરુહ્ય પરિજનાંસાવલમ્બી તિષ્ઠતિ )
વેત્રવતિ કિમુદ્દિશ્ય ભગવતા કાશ્યપેન મત્સકાશમૃષયઃ પ્રેષિતાઃ
સ્યુઃ ।
કિં તાવદ્વ્રતિનામુપોઢતપસાં વિઘ્નૈસ્તપો દૂષિતં
ધર્મારણ્યચરેષુ કેનચિદુત પ્રાણિષ્વસચ્ચેષ્ટિતમ્ ।
આહોસ્વિત્પ્રસવો મમાપચરિતૈર્વિષ્ટમ્ભિતો
વીરુધામિત્યારૂઢબહુપ્રતર્કમપરિચ્છેદાકુલં મે મનઃ ॥ ૯॥

પ્રતિહારી – સુચરિતનન્દિન ઋષયો દેવં સભાજયિતુમાગતા ઇતિ
તર્કયામિ ।
( તતઃ પ્રવિશન્તિ ગૌતમીસહિતાઃ શકુંતલાં પુરસ્કૃત્ય મુનયઃ ।
પુરશ્ચૈષાં કઞ્ચુકી પુરોહિતશ્ચ )
કઞ્ચુકી – ઇત ઇતો ભવન્તઃ ।
શાર્ઙ્ગરવઃ – શારદ્વત ।
મહાભાગઃ કામં નરપતિરભિન્નસ્થિતિરસૌ
ન કશ્ચિદ્વર્ણાનામપથમપકૃષ્ટોઽપિ ભજતે ।
તથાપીદં શશ્વત્પરિચિતવિવિક્તેન મનસા
જનાકીર્ણં મન્યે હુતવહપરીતં ગૃહમિવ ॥ ૧૦॥

શારદ્વતઃ – સ્થાને ભવાન્પુરપ્રવેશાદિત્થમ્ભૂતઃ સંવૃત્તઃ ।
અહમપિ
અભ્યક્તમપિ સ્નાતઃ શુચિરશુચિમિવ પ્રબુદ્ધ ઇવ સુપ્તમ્ ।

બધ્દ્ધમિવ સ્વૈરગતિર્જનમિહ સુખસઙ્ગિનમવૈમિ ॥ ૧૧॥

શકુંતલા – ( નિમિત્તં સૂચયિત્વા )
અહો કિં મે વામેતરન્નયનં વિસ્ફુરતિ ।
ગૌતમી – જાતે પ્રતિહતમમઙ્ગલમ્ । સુખાનિ તે ભર્તૃકુલદેવતા
વિતરન્તુ ।
( ઇતિ પરિક્રામતિ )
પુરોહિતઃ – ( રાજાનં નિર્દિશ્ય )
ભો ભોસ્તપસ્વિનઃ અસાવત્રભવાન્વર્ણાશ્રમાણાં રક્ષિતા પ્રાગેવ
મુક્તાસનો વઃ પ્રતિપાલયતિ । પશ્યતૈનમ્ ।
શાર્ઙ્ગરવઃ – ભો મહાબ્રાહ્મણ કામમેતદભિનન્દનીયં તથાપિ
વયમત્ર મધ્યસ્થાઃ । કુતઃ
ભવન્તિ નમ્રાસ્તરવઃ ફલાગમૈર્નવામ્બુભિર્દૂરવિલમ્બિનો ઘનાઃ ।
અનુધ્દ્ધતાઃ સત્પુરુષાઃ સમૃધ્દ્ધિભિઃ સ્વભાવ એવૈષ પરોપકારિણામ્
॥ ૧૨॥

પ્રતીહારી – દેવ પ્રસન્નમુખવર્ણા દૃશ્યન્તે । જાનામિ
વિશ્રબ્ધકાર્યા ઋષયઃ ।
રાજાઃ – ( શકુંતલાં દૃષ્ટ્વા )
અથાત્રભવતી
કા સ્વિદવગુણ્ઠનવતી નાતિપરિસ્ફુટશરીરલાવણ્યા ।
મધ્યે તપોધનાનાં કિસલયમિવ પાણ્ડુપત્રાણામ્ ॥ ૧૩॥

પ્રતીહારી – દેવ કુતૂહલગર્ભઃ પ્રહિતો ન મે તર્કઃ પ્રસરતિ । નનુ
દર્શનીયા પુનરસ્યા આકૃતિર્લક્ષ્યતે ।
રાજાઃ – ભવતુ । અનિર્વર્ણનીયં પરકલત્રમ્ ।
શકુંતલા – ( હસ્તમુરસિ કૃત્વા । આત્મગતમ્ )
હૃદય કિમેવં વેપસે । આર્યપુત્રસ્ય ભાવમવધાર્ય ધીરં તાવદ્ભવ ।

પુરોહિતઃ – ( પુરો ગત્વા )
એતે વિધિવદર્ચિતાસ્તપસ્વિનઃ । કશ્ચિદેષામુપાધ્યાયસંદેશઃ । તં
દેવઃ શ્રોતુમર્હતિ ।
રાજાઃ – અવહિતોઽસ્મિ ।
ઋષયઃ – ( હસ્તાનુદ્યમ્ય )

વિજયસ્વ રાજન્ ।
રાજાઃ – સર્વાનભિવાદયે ।
ઋષયઃ – ઇષ્ટેન યુજ્યસ્વ ।
રાજાઃ – અપિ નિર્વિઘ્નતપસો મુનયઃ ।
ઋષયઃ –
કુતો ધર્મક્રિયાવિઘ્નઃ સતાં રક્ષિતરિ ત્વયિ ।
તમસ્તપતિ ધર્માંશૌ કથમાવિર્ભવિષ્યતિ ॥ ૧૪॥

રાજાઃ – અર્થવાન્ખલુ મે રાજશબ્દઃ । અથ ભગવાન્લોકાનુગ્રહાય
કુશલી કાશ્યપઃ ।
શાર્ઙ્ગરવઃ – સ્વાધીનકુશલાઃ સિદ્ધિમન્તઃ । સ
ભવન્તમનામયપ્રશ્નપૂર્વકમિદમાહ ।
રાજાઃ – કિમાજ્ઞાપયતિ ભગવાન્ ।
શાર્ઙ્ગરવઃ – યન્મિથઃસમયાદિમાં મદીયાં દુહિતરં
ભવાનુપાયંસ્ત તન્મયા પ્રીતિમતા યુવયોરનુજ્ઞાતમ્ । કુતઃ
ત્વમર્હતાં પ્રાગ્રસરઃ સ્મૃતોઽસિ નઃ
શકુંતલા મૂર્તિમતી ચ સત્ક્રિયા ।
સમાનયંસ્તુલ્યગુણં વધૂવરં
ચિરસ્ય વાચ્યં ન ગતઃ પ્રજાપતિઃ ॥ ૧૫॥

તદિદાનીમાપન્નસત્ત્વેયં પ્રતિગૃહ્યતાં સહધર્માચરણાયેતિ ।
ગૌતમી – આર્ય કિમપિ વક્તુકામાસ્મિ । ન મે વચનાવસરોઽસ્તિ ।
કથમિતિ ।
નાપેક્ષિતો ગુરુજનોઽનયા ત્વયા પૃષ્ટો ન બન્ધુજનઃ ।
એકૈકસ્મિન્નેવ ચરિતે ભણામિ કિમેકૈકમ્ ॥ ૧૬॥

શકુંતલા – ( આત્મગતમ્ )
કિં નુ ખલ્વાર્યપુત્રો ભણતિ ।
રાજાઃ – કિમિદમુપન્યસ્તમ્ ।
શકુંતલા – ( આત્મગતમ્ )
પાવકઃ ખલુ વચનોપન્યાસઃ ।
શાર્ઙ્ગરવઃ – કથમિદં નામ । ભવન્ત એવ સુતરાં
લોકવૃત્તાન્તનિષ્ણાતાઃ ।
સતીમપિ જ્ઞાતિકુલૈકસંશ્રયાં

જનોઽન્યથા ભર્તૃમતીં વિશઙ્કતે ।
અતઃ સમીપે પરિણેતુરિષ્યતે ।
પ્રિયાઽપ્રિયા વા પ્રમદા સ્વબન્ધુભિઃ ॥ ૧૭॥

રાજાઃ – કિમત્રભવતી મયા પરિણીતપૂર્વા ।
શકુંતલા – ( સવિષાદમ્ આત્મગતમ્ )
હૃદય સામ્પ્રતં તે આશઙ્કા ।
શાર્ઙ્ગરવઃ –
કિં કૃતકાર્યદ્વેષો ધર્મં પ્રતિ વિમુખતા ।
કૃતાવજ્ઞા ।
રાજાઃ – કુતોઽયમસત્કલ્પનાપ્રશ્નઃ ।
શાર્ઙ્ગરવઃ –
મૂર્ચ્છન્ત્યમી વિકારાઃ પ્રાયેણૈશ્વર્યમત્તેષુ ॥ ૧૮॥

રાજાઃ – વિશેષેણધિક્ષિપ્તોઽસ્મિ ।
ગૌતમી – જાતે મુહૂર્તં મા લજ્જસ્વ । અપનેષ્યામિ
તાવત્તેઽવગુણ્ઠનમ્ । તતસ્ત્વાં ભર્તાભિજ્ઞાસ્યતિ ।
( ઇતિ યથોક્તં કરોતિ )
રાજાઃ – ( શકુંતલાં નિર્વર્ણ્ય । આત્મગતમ્ )
ઇદમુપનતમેવં રૂપમક્લિષ્ટકાન્તિ
પ્રથમપરિગૃહીતં સ્યાન્ન વેત્યવ્યવસ્યન્ ।
ભ્રમર ઇવ વિભાતે કુન્દમન્તસ્તુષારં
ન ચ ખલુ પરોભોક્તું નાપિ શક્નોમિ હાતુમ્ ॥ ૧૯॥

( ઇતિ વિચારયન્સ્થિતઃ )
પ્રતીહારી – ( સ્વગતમ્ )
અહો ધર્માપેક્ષિતા ભર્તુઃ । ઇદૃશં નામ સુખોપનતં રૂપં દૃષ્ટા
કોઽન્યો વિચારયતિ ।
શાર્ઙ્ગરવઃ – ભો રાજન્ કિમિતિ જોષમાસ્યતે ।
રાજાઃ – ભોસ્તપોધનાઃ ચિન્તયન્નપિ ન ખલુ સ્વીકરણમત્રભવત્યાઃ
સ્મરામિ । તત્કથમિમામભિવ્યક્તસત્ત્વલક્ષણાં પ્રત્યાત્માનં
ક્ષેત્રિણમાશઙ્કમાનઃ પ્રતિપત્સ્યે ।
શકુંતલા – ( અપવાર્ય )
આર્યસ્ય પરિણય એવ સંદેહઃ । કુત ઇદાનીં મે દૂરાધિરોહિણ્યાશા ।

શાર્ઙ્ગરવઃ– મા તાવત્ ।

કૃતાભિમર્શામનુમન્યમાનઃ સુતાં ત્વયા નામ મુનિર્વિમાન્યઃ ।
મુષ્ટં પ્રતિગ્રાહયતા સ્વમર્થં પાત્રીકૃતો દસ્યુરિવાસિ યેન ॥ ૨૦॥

શારદ્વતઃ – શાર્ઙ્ગરવ વિરમ ત્વમિદાનીમ્ । શકુન્તલે
વક્તવ્યમુક્તમસ્માભિઃ । સોઽયમત્રભવાનેવમાહ ।
દીયતામસ્મૈ પ્રત્યયપ્રતિવચનમ્ ।
શકુંતલા – ( અપવાર્ય )
ઇદમવસ્થાન્તરં ગતે તાદૃશેઽનુરાગે કિં વા સ્મારિતેન । આત્મેદાનીં
મે શોચનીય ઇતિ વ્યવસિતમેતત્ ।
( પ્રકાશમ્ )
આર્યપુત્ર -
( ઇત્યર્ધોક્તે )
સંશયિત ઇદાનીં પરિણયે નૈષ સમુદાચારઃ ।
પૌરવ યુક્તં નામ તે તથા પુરાશ્રમપદે સ્વભાવોત્તાનહૃદયમિમં
જનં સમયપૂર્વં પ્રતાર્ય સામ્પ્રતમીદૃશૈરક્ષરૈઃ પ્રત્યાખ્યાતુમ્ ।
રાજાઃ – ( કર્ણૌ વિધાય )
શાન્તં પાપમ્ ।
વ્યપદેશમાવિલયિતું કિમીહસે જનમિમં ચ પાતયિતુમ્ ।
કૂલંકષેવ સિન્ધુઃ પ્રસન્નમમ્ભસ્તટતરું ચ ॥ ૨૧॥

શકુંતલા – ભવતુ । યદિ પરમાર્થતઃ પરપરિગ્રહશઙ્કિના
ત્વયૈવં પ્રવૃત્તં તદભિજ્ઞાનેનાનેન તવાશઙ્કામપનેષ્યામિ ।
રાજાઃ – ઉદારઃ કલ્પઃ ।
શકુંતલા – ( મુદ્રાસ્થાનં પરામૃશ્ય )
હા ધિક્ હા ધિક્ । અઙ્ગુલીયકશૂન્યા મેઽઙ્ગુલિઃ ।
( ઇતિ સવિષાદં ગૌતમીમવેક્ષતે )
ગૌતમી – નૂનં તે શક્રાવતારાભ્યન્તરે શચીતીર્થસલિલં
વન્દમાનાયાઃ પ્રભ્રષ્ટમઙ્ગુલીયકમ્ ।
રાજાઃ – ( સસ્મિતમ્ )
ઇદં તત્પ્રત્યુત્પન્નમતિ સ્ત્રૈણમિતિ યદુચ્યતે ।
શકુંતલા – અત્ર તાવદ્વિધિના દર્શિતં પ્રભુત્વમ્ । અપરં તે
કથયિષ્યામિ ।

રાજાઃ – શ્રોતવ્યમિદાનીં સંવૃત્તમ્ ।
શકુંતલા – નન્વેકસ્મિન્દિવસે નવમાલિકામણ્ડપે
નલિનીપત્રભાજનગતમુદકં તવ હસ્તે સન્નિહિતમાસીત્ ।
રાજાઃ – શ ૃણુમસ્તાવત્ ।
શકુંતલા – તત્ક્ષણે સ મે પુત્રકૃતકો દીર્ઘાપાઙ્ગો નામ મૃગપોતક
ઉપસ્થિતઃ । ત્વયાયં તાવત્પ્રથમં પિબત્વિત્યનુકમ્પિનોપચ્છન્દિત ઉદકેન
। ન પુનસ્તેઽપરિચયાધ્દસ્તાભ્યાસમુપગતઃ । પશ્ચાત્તસ્મિન્નેવ મયા
ગૃહીતે સલિલેઽનેન કૃતઃ પ્રણયઃ । તદા ત્વમિત્થં પ્રહસિતોઽસિ ।
સર્વઃ સગંધેષુ વિશ્વસિતિ । દ્વાવપ્યત્રારણ્યકાવિતિ ।
રાજાઃ –
એવમાદિભિરાત્મકાર્યનિર્વર્તિનીનામનૃતમયવાઙ્મધુભિરાકૃષ્યન્તે
વિષયિણઃ ।
ગૌતમી – મહાભાગ નાર્હસ્યેવં મન્ત્રયિતુમ્ ।
તપોવનસંવર્ધિતોઽનભિજ્ઞોઽયં જનઃ કૈતવસ્ય ।
રાજાઃ – તાપસવૃદ્ધે ।
સ્ત્રીણામશિક્ષિતપટુત્વમમાનુષીષુ
સંદૃશ્યતે કિમુત યાઃ પ્રતિબોધવત્યઃ ।
પ્રાગન્તરિક્ષગમનાસ્ત્વમપત્યજાતમન્યૈર્દ્વિજૈઃ
પરભૃતાઃ ખલુ પોષયન્તિ ॥ ૨૨॥

શકુંતલા – ( સરોષમ્ )
અનાર્ય આત્મનો હૃદયાનુમાનેન પ્રેક્ષસે । ક ઇદાનીમન્યો
ધર્મકઞ્ચુકપ્રવેશિનસ્તૃણચ્છન્નકૂપોપમસ્ય તવાનુકૃતિં
પ્રતિપત્સ્યતે ।
રાજાઃ – ( આત્મગતમ્ )
સંદિગ્ધબુદ્ધિં માં કુર્વન્નકૈતવ ઇવાસ્યાઃ કોપો લક્ષ્યતે । તથા હ્યનયા
મય્યેવ વિસ્મરણદારુણચિત્તવૃત્તૌ
વૃત્તં રહઃ પ્રણયમપ્રતિપદ્યમાને ।
ભેદાદ્ભ્રુવોઃ કુટિલયોરતિલોહિતાક્ષ્યા
ભગ્નં શરાસનમિવાતિરુષા સ્મરસ્ય ॥ ૨૩॥

( પ્રકાશમ્ )
ભદ્રે પ્રથિતં દુષ્યન્તસ્ય ચરિતમ્ । તથાપીદં ન દૃશ્યતે ।

શકુંતલા – સુષ્ઠુ તાવદત્ર સ્વચ્છન્દચારિણી કૃતાસ્મિ
યાહમસ્ય પુરુવંશપ્રત્યયેન મુખમધોર્હૃદયવિષસ્ય
હસ્તાભ્યાસમુપગતા ।
શાર્ઙ્ગરવઃ – ઇત્થમાત્મકૃતં ચાપલં દહતિ ।
અતઃ પરીક્ષ્ય કર્તવ્યં વિશેષાત્સંગતં રહઃ ।
અજ્ઞાતહૃદયેષ્વેવં વૈરીભવતિ સૌહૃદમ્ ॥ ૨૪॥

રાજાઃ – અયિ ભોઃ કિમત્રભવતીપ્રત્યયાદેવાસ્માન્સંયુતદોષાક્ષરૈઃ
ક્ષિણુથ ।
શાર્ઙ્ગરવઃ –( સાસૂયમ્ )
શ્રુતં ભવદ્ભિરધરોત્તરમ્ ।
આ જન્મનઃ શાઠ્યમશિક્ષિતો યસ્તસ્યાપ્રમાણં વચનં જનસ્ય ।
પરાતિસંધાનમધીયતે યૈર્વિદ્યેતિ તે સન્તુ કિલાપ્તવાચઃ ॥ ૨૫॥

રાજાઃ – ભોઃ સત્યવાદિન્ અભ્યુપગતં તાવદસ્માભિરેવમ્ । કિં
પુનરિમામતિસંધાય લભ્યતે ।
શાર્ઙ્ગરવઃ – વિનિપાતઃ ।
રાજાઃ – વિનિપાતઃ પૌરવૈઃ પ્રાર્થ્યત ઇતિ ન શ્રદ્ધેયમેતત્ ।
શારદ્વતઃ– શાર્ઙ્ગરવ કિમુત્તરેણ । અનુષ્ઠિતો ગુરોઃ સંદેશઃ ।
પ્રતિનિવર્તામહે વયમ્ ।
( રાજાનં પ્રતિ )
તદેષા ભવતઃ કાન્તા ત્યજ વૈનાં ગૃહાણ વા ।
ઉપપન્ના હિ દારેષુ પ્રભુતા સર્વતોમુખી ॥ ૨૬॥

ગૌતમિ ગચ્છાગ્રતઃ ।
( ઇતિ પ્રસ્થિતાઃ )
શકુંતલા – કથમનેન કિતવેન વિપ્રલબ્ધાસ્મિ । યૂયમપિ માં
પરિત્યજથ ।
( ઇત્યનુપ્રતિષ્ઠતે )
ગૌતમી – ( સ્થિત્વા )
વત્સ શાર્ઙ્ગરવ અનુગચ્છતીયં ખલુ નઃ કરુણપરિદેવિની શકુંતલા ।
પ્રત્યાદેશપરુષે ભર્તરિ કિં વા મે પુત્રિકા કરોતુ ।
શાર્ઙ્ગરવઃ – ( સરોષં નિવૃત્ય )
કિં પુરોભાગે સ્વાતન્ત્ર્યમવલમ્બસે ।

( શકુંતલા ભીતા વેપતે )
શાર્ઙ્ગરવઃ – શકુંતલે ।
યદિ યથા વદતિ ક્ષિતિપસ્તથા ત્વમસિ કિં પિતુરુત્કુલયા ત્વયા ।
અથ તુ વેત્સિ શુચિ વ્રતમાત્મનઃ પતિકુલે તવ દાસ્યમપિ ક્ષમમ્ ॥ ૨૭॥

તિષ્ઠ । સાધયામો વયમ્ ।
રાજાઃ – ભોસ્તપસ્વિન્ કિમત્રભવતીં વિપ્રલભસે ।
કુમુદાન્યેવ શશાઙ્કઃ સવિતા બોધયતિ પઙ્કજાન્યેવ ।
વશિનાં હિ પરપરિગ્રહસંશ્લેષપરાઙ્મુખી વૃત્તિઃ ॥ ૨૮॥

શાર્ઙ્ગરવઃ – યદા તુ પૂર્વવૃત્તમન્યસઙ્ગાદ્વિસ્મૃતો ભવાંસ્તદા
કથમધર્મભીરુઃ ।
રાજાઃ – ભવન્તમેવાત્ર ગુરુલાઘવં પૃચ્છામિ ।
મૂઢઃ સ્યામહમેષા વા વદેન્મિથ્યેતિ સંશયે ।
દારત્યાગી ભવામ્યાહો પરસ્ત્રીસ્પર્શપાંસુલઃ ॥ ૨૯॥

પુરોહિતઃ – ( વિચાર્ય )
યદિ તાવદેવં ક્રિયતામ્ ।
રાજાઃ – અનુશાસ્તુ માં ભવાન્ ।
પુરોહિતઃ – અત્રભવતી તાવદાપ્રસવાદસ્મદ્ગૃહે તિષ્ઠતુ । કુત
ઇદમુચ્યત ઇતિ ચેત્ । ત્વં સાધુભિરાદિષ્ટપૂર્વઃ પ્રથમમેવ
ચક્રવર્તિનં પુત્રં જનયિષ્યસીતિ । સ ચેન્મુનિદૌહિત્રસ્તલ્લક્ષણોપપન્નો
ભવિષ્યતિ અભિનન્દ્ય શુદ્ધાન્તમેનાં પ્રવેશયિષ્યસિ । વિપર્યયે તુ
પિતુરસ્યાઃ સમીપનયનમવસ્થિતમેવ ।
રાજાઃ – યથા ગુરુભ્યો રોચતે ।
પુરોહિતઃ – વત્સે અનુગચ્છ મામ્ ।
શકુંતલા – ભગવતિ વસુધે દેહિ મે વિવરમ્ ।
( ઇતિ રુદતી પ્રસ્થિતા । નિષ્ક્રાન્તા સહ પુરોધસા તપસ્વિભિશ્ચ )
( રાજા શાપવ્યવહિતસ્મૃતિઃ શકુંતલાગતમેવ ચિન્તયતિ )
( નેપથ્યે )
આશ્ચર્યમાશ્ચર્યમ્ ।
રાજાઃ – ( આકર્ણ્ય )
કિં નુ ખલુ સ્યાત્ ।
( પ્રવિશ્ય )

પુરોહિતઃ – ( સવિસ્મયમ્ )
દેવ અદ્ભુતં ખલુ સંવૃત્તમ્ ।
રાજાઃ – કિમિવ ।
પુરોહિતઃ – દેવ પરાવૃત્તેષુ કણ્વશિષ્યેષુ -
સા નિન્દન્તી સ્વાનિ ભાગ્યાનિ બાલા બાહૂત્ક્ષેપં ક્રન્દિતું ચ પ્રવૃત્તા ।
રાજાઃ – કિં ચ ।
પુરોહિતઃ –
સ્ત્રીસંસ્થાનં ચાપ્સરસ્તીર્થમારાદુત્ક્ષિપ્યૈનાં જ્યોતિરેકં જગામ ॥ ૩૦॥

( સર્વે વિસ્મયં રૂપયન્તિ )
રાજાઃ – ભગવન્ પ્રાગપિ સોઽસ્માભિરર્થઃ પ્રત્યાદિષ્ટ એવ । કિં
વૃથા તર્કેણાન્વિષ્યતે । વિશ્રામ્યતુ ભવાન્ ।
પુરોહિત – ( વિલોક્ય )
વિજયસ્વ ।
( ઇતિ નિષ્ક્રાન્તઃ )
રાજાઃ – વેત્રવતિ પર્યાકુલોઽસ્મિ । શયનભૂમિમાર્ગમાદેશય ।
પ્રતીહારી – ઇત ઇતો દેવઃ ।
( ઇતિ પ્રસ્થિતા )
રાજાઃ –
કામં પ્રત્યાદિષ્ટાં સ્મરામિ ન પરિગ્રહં મુનેસ્તનયામ્ ।
બલવત્તુ દૂયમાનં પ્રત્યાયયતીવ માં હૃદયમ્ ॥ ૩૧॥

( ઇતિ નિષ્ક્રાન્તાઃ સર્વે )

( ઇતિ પઞ્ચમોઽઙ્કઃ । )

ષષ્ઠોઽઙ્કઃ ।

( તતઃ પ્રવિશતિ નાગરિકઃ શ્યાલઃ પશ્ચાદ્બદ્ધં પુરુષમાદાય
રક્ષિણૌ ચ )
રક્ષિણૌ – ( પુરુષં તાડયિત્વા )
અરે કુમ્ભીરક કથય કુત્ર ત્વયેતન્મણિબન્ધનોત્કીર્ણનામધેયં
રાજકીયમઙ્ગુલીયકં સમાસાદિતમ્ ।
પુરુષઃ – ( ભીતિનાટિતકેન )
પ્રસીદન્તુ ભાવમિશ્રાઃ । નાહમીદૃશકર્મકારી ।

પ્રથમઃ – કિં શોભનો બ્રાહ્મણ ઇતિ કૃત્વા
( કલયિત્વા )
રાજ્ઞા પ્રતિગ્રહો દત્તઃ ।
પુરુષઃ – શૃણુતેદાનીમ્ । અહં શક્રાવતારાભ્યન્તરવાસી
ધીવરઃ ।
દ્વિતિયઃ –પાટચ્ચર કિમસ્માભિર્જાતિઃ પૃષ્ટા ।
શ્યાલઃ – સૂચક કથયતુ સર્વનનુક્રમેણ । મૈનમન્તરા
પ્રતિબધ્નીતમ્ ।
ઉભૌ – યદાવુત્ત આજ્ઞાપયતિ । કથય ।
પુરુષઃ – અહં જાલોદ્ગાલાદિભિર્મત્સ્યબન્ધનોપાયૈઃ કુટુમ્બભરણં
કરોમિ ।
શ્યાલઃ – ( વિહસ્ય )
વિશુદ્ધ ઇદાનીમાજીવઃ ।
પુરુષઃ – ભર્તઃ મા એવં ભણ ।
સહજં કિલ યદ્વિનિન્દિતં ન ખલુ તત્કર્મ વિવર્જનીયમ્ ।
પશુમારણકર્મદારુણોઽનુકમ્પામૃદુરેવ શ્રોત્રિયઃ ॥ ૧॥

શ્યાલઃ – તતસ્તતઃ ।
પુરુષઃ – એકસ્મિન્દિવસે ખણ્ડશો રોહિતમત્સ્યો મયા કલ્પિતઃ ।
યાવત્તસ્યોદરાભ્યન્તરે પ્રેક્ષે તાવદિદં રત્નભાસુરમઙ્ગુલીયકં
દૃષ્ટમ્ । પશ્ચાદહમસ્ય વિક્રયાય દર્શયન્ગૃહીતો ભાવમિશ્રૈઃ ।
મારયત વા મુઞ્ચત વા । અયમસ્યાગમવૃત્તાન્તઃ ।
શ્યાલઃ – જાનુક વિસ્રગન્ધી ગોધાદી મત્સ્યબન્ધ એવ નિઃસંશયમ્ ।
અઙ્ગુલીયકદર્શનમસ્ય વિમર્શયિતવ્યમ્ । રાજકુલમેવ ગચ્છામઃ ।
રક્ષિણૌ – તથા । ગચ્છ અરે ગ્રન્થિભેદક ।
( સર્વે પરિક્રામન્તિ )
શ્યાલઃ – સૂચક ઇમં ગોપુરદ્વારેઽપ્રમત્તૌ પ્રતિપાલયતં
યાવદિદમઙ્ગુલીયકં યથાગમનં ભર્તે નિવેદ્ય તતઃ શાસનં પ્રતીષ્ય
નિષ્ક્રામામિ ।
ઉભૌ – પ્રવિશત્વાવુત્તઃ સ્વામિપ્રસાદાય ।
( ઇતિ નિષ્ક્રાન્તઃ શ્યાલઃ )
પ્રથમઃ – જાનુક ચિરાયતે ખલ્વાવુત્તઃ ।

દ્વિતીયઃ – નન્વવસરોપસર્પણીયા રાજાનઃ ।
પ્રથમઃ – જાનુક સ્ફુરતો મમ હસ્તાવસ્ય વધસ્ય સુમનસઃ પિનદ્ધુમ્
।
( ઇતિ પુરુષં નિર્દિશતિ )
પુરુષઃ – નાર્હતિ ભાવોऽકારણમારણો ભવિતુમ્ ।
દ્વિતીયઃ – ( વિલોક્ય )
એષ નૌ સ્વામી પત્રહસ્તો રાજશાસનં પ્રતીષ્યેતોમુખો દૃશ્યતે ।
ગૃધ્રબલિર્ભવિષ્યસિ શુનો મુખં વા દ્રક્ષ્યાસિ ।
( પ્રવિશ્ય )
શ્યાલઃ – સૂચક મુચ્યતામેષ જાલોપજીવી । ઉપપન્નઃ
ખલ્વસ્યાઙ્ગુલીયકસ્યાગમઃ ।
સૂચકઃ – યથાવુત્તો ભણતિ । એષ યમસદનં પ્રવિશ્ય
પ્રતિનિવૃત્તઃ ।
( ઇતિ પુરુષં પરિમુક્તબન્ધનં કરોતિ )
પુરુષઃ – ( શ્યાલં પ્રણમ્ય )
ભર્તઃ અથ કીદૃશો મ આજીવઃ ।
શ્યાલઃ – એષ ભર્ત્રાઙ્ગુલીયકમૂલ્યસમ્મિતઃ પ્રસાદોऽપિ દાપિતઃ ।
( ઇતિ પુરુષાય સ્વં પ્રયચ્છતિ )
પુરુષઃ – ( સપ્રણામં પ્રતિગૃહ્ય )
ભર્તઃ અનુગૃહીતોऽસ્મિ ।
સૂચકઃ – એષ નામાનુગ્રહો યચ્છૂલાદવતાર્ય હસ્તિસ્કન્ધે
પ્રતિષ્ઠાપિતઃ ।
જાનુક – આવુત્ત પારિતોષિકં કથયતિ તેનાઙ્ગુલીયકેન ભર્તુઃ
સમ્મતેન ભવિતવ્યમિતિ ।
શ્યાલઃ – ન તસ્મિન્મહાર્હં રત્નં ભર્તુર્બહુમતમિતિ તર્કયામિ । તસ્ય
દર્શનેન ભર્ત્રાऽભિમતો જનઃ સ્મૃતઃ । મુહૂર્તં પ્રકૃતિગમ્ભીરોऽપિ
પર્યશ્રુનયન આસીત્ ।
સૂચકઃ – સેવિતં નામાવુત્તેન ।
જાનુકઃ – નનુ ભણ । અસ્ય કૃતે માત્સ્યિકભર્તુરિતિ ।
( ઇતિ પુરુષમસૂયયા પશ્યતિ )
પુરુષઃ – ભટ્ટારક ઇતોऽર્ધં યુષ્માકં સુમનોમૂલ્યં ભવતુ ।
જાનુકઃ – એતાવદ્યુજ્યતે ।

શ્યાલઃ – ધીવર મહત્તરસ્ત્વં પ્રિયવયસ્યક ઇદાનીં મે સંવૃત્તઃ ।
કાદમ્બરીસાક્ષિકમસ્માકં પ્રથમસૌહૃદમિષ્યતે । તચ્છૌણ્ડિકાપણમેવ
ગચ્છામઃ ।
(ઇતિ નિષ્ક્રાન્તાઃ સર્વે)
પ્રવેશકઃ ।
( તતઃ પ્રવિશત્યાકાશયાનેન સાનુમતી નામાપ્સરાઃ )
સાનુમતી – નિર્વર્તિતં મયા
પર્યાયનિર્વર્તનીયમપ્સરસ્તીર્થસાંનિધ્યં
યાવત્સાધુજનસ્યભિષેકકાલ ઇતિ સામ્પ્રતમસ્ય રાજર્ષેરુદન્તં
પ્રત્યક્ષીકરિષ્યામિ । મેનકાસમ્બન્ધેન શરીરભૂતા મે શકુંતલા ।
તયા ચ દુહિતૃનિમિત્તમાદિષ્ટપૂર્વાસ્મિ ।
( સમન્તાદવલોક્ય )
કિં નુ ખલુ ઋતૂત્સવેઽપિ નિરુત્સવારમ્ભમિવ રાજકુલં દૃશ્યતે । અસ્તિ
મે વિભવઃ પ્રણિધાનેન સર્વં પરિજ્ઞાતુમ્ । કિં તુ સખ્યા આદરો મયા
માનયિતવ્યઃ । ભવતુ । અનયોરેવોદ્યાનપાલિકયોસ્તિરસ્કરિણીપ્રતિચ્છન્ના
પાર્શ્વવર્તિની ભૂત્વોપલપ્સ્યે ।
( ઇતિ નાટ્યેનાવતીર્ય સ્થિતા )
( તતઃ પ્રવિશતિ ચૂતાઙ્કુરમવલોકયન્તી ચેટી । અપરા ચ
પૃષ્ઠતસ્તસ્યાઃ )
પ્રથમા –
આતામ્રહરિતપાણ્ડુર જીવિતસર્વં વસન્તમાસસ્ય ( યોઃ ) ।
દૃષ્ટોઽસિ ચૂતકોરક ઋતુમઙ્ગલ ત્વાં પ્રસાદયામિ ॥ ૨॥

દ્વિતીયા – પરભૃતિકે કિમેકાકિની મન્ત્રયસે ।
પ્રથમા – મધુકરિકે ચૂતકલિકાં દૃષ્ટ્વોન્મત્તા પરભૃતિકા
ભવતિ ।
દ્વિતીયા – ( સહર્ષં ત્વરયોપગમ્ય )
કથમુપસ્થિતો મધુમાસઃ ।
પ્રથમા – મધુકરિકે તવેદાનીં કાલ એષ મદવિભ્રમગીતાનામ્ ।
દ્વિતીયા – સખિ અવલમ્બસ્વ માં યાવદગ્રપાદસ્થિતા ભૂત્વા
ચૂતકલિકાં ગૃહીત્વા કામદેવાર્ચનં કરોમિ ।
પ્રથમા – યદિ મમાપિ ખલ્વર્ધમર્ચનફલસ્ય ।

દ્વિતીયા – અકથિતેઽપ્યેતત્સમ્પદ્યતે યત એકમેવ નૌ જીવીતં
દ્વિધાસ્થિતં શરીરમ્ ।
( સખીમવલમ્બ્ય સ્થિતા ચૂતાઙ્કુરં ગૃહ્ણાતિ )
અયે અપ્રતિબુદ્ધોઽપિ ચૂતપ્રસવોઽત્ર બન્ધનભઙ્ગસુરભિર્ભવતિ ।
( ઇતિ કપોતહસ્તકં કૃત્વા )
ત્વમસિ મયા ચૂતાઙ્કુર દત્તઃ કામાય ગૃહીતધનુષે ।
પથિકજનયુવતિલક્ષ્યઃ પઞ્ચાભ્યધિકઃ શરો ભવ ॥ ૩॥

( ઇતિ ચૂતાઙ્કુરં ક્ષિપતિ )
( પ્રવિશ્યાપટીક્ષેપેણ કુપિતઃ ) ।
કઞ્ચુકી – મા તાવદનાત્મજ્ઞે । દેવેન પ્રતિષિદ્ધે વસન્તોત્સવે
ત્વમામ્રકલિકાભઙ્ગં કિમારભસે ।
ઉભે – ( ભીતે )
પ્રસીદત્વાર્યઃ । અગૃહીતાર્થે આવામ્ ।
કઞ્ચુકી – ન કિલ શ્રુતં યુવાભ્યાં યદ્વાસન્તિકૈસ્તરુભિરપિ દેવસ્ય
શાસનં પ્રમાણીકૃતં તદાશ્રયિભિઃ પત્રિભિશ્ચ । તથા હિ
ચૂતાનાં ચિરનિર્ગતાપિ કલિકા બધ્નાતિ ન સ્વં રજઃ
સન્નદ્ધં યદપિ સ્થિતં કુરબકં તત્કોરકાવસ્થયા ।
કણ્ઠેષુ સ્ખલિતં ગતેઽપિ શિશિરે પુંસ્કોકિલાનાં રુતં
શઙ્કે સંહરતિ સ્મરોઽપિ ચકિતસ્તૂણાર્ધકૃષ્ટં શરમ્ ॥ ૪॥

સનુમતી – નાસ્તિ સંદેહઃ । મહાપ્રભાવો રાજર્ષિઃ ।
પ્રથમા – આર્ય કતિ દિવસાન્યાવયોર્મિત્રાવસુના રાષ્ટ્રિયેણ
ભટ્ટિનીપાદમૂલં પ્રેષિતયોઃ । અત્ર ચ નૌ પ્રમદવનસ્ય પાલનકર્મ
સમર્પિતમ્ । તદાગન્તુકતયાઽશ્રુતપૂર્વ આવાભ્યામેષ વૃત્તાન્તઃ ।
કઞ્ચુકી – ભવતુ । ન પુનરેવં પ્રવર્તિતવ્યમ્ ।
ઉભે – આર્ય કૌતૂહલં નૌ । યદ્યનેન જનેન શ્રોતવ્યં કથયત્વાર્યઃ
કિન્નિમિત્તં ભર્ત્રા વસન્તોત્સવઃ પ્રતિષિદ્ધઃ ।
સાનુમતી – ઉત્સવપ્રિયાઃ ખલુ મનુષ્યાઃ । ગુરુણા કારણેન
ભવિતવ્યમ્ ।
કઞ્ચુકી – બહુલીભૂતમેતત્કિં ન કથ્યતે । કિમત્રભવત્યોઃ કર્ણપથં
નાયાતં શકુંતલાપ્રત્યાદેશકૌલીનમ્ ।
ઉભે – શ્રુતં રાષ્ટ્રિયમુખાદ્યાવદઙ્ગુલીયકદર્શનમ્ ।

કઞ્ચુકી – તેન હ્યલ્પં કથયિતવ્યમ્ । યદૈવ ખલુ
સ્વાઙ્ગુલીયકદર્શનાદનુસ્મૃતં દેવેન સત્યમૂઢપૂર્વા મે તત્રભવતી
રહસિ શકુંતલા મોહાત્પ્રત્યાદિષ્ટેતિ તદાપ્રભૃત્યેવ
પશ્ચાત્તાપમુપગતો દેવઃ । તથા હિ
રમ્યં દ્વેષ્ટિ યથા પુરા પ્રકૃતિભિર્ન પ્રત્યહં સેવ્યતે
શય્યાપ્રાન્તવિવર્તનૈર્વિગમયત્યુન્નિદ્ર એવ ક્ષપાઃ ।
દાક્ષિણ્યેન દદાતિ વાચમુચિતામન્તઃપુરેભ્યો યદા ગોત્રેષુ
સ્ખલિતસ્તદા ભવતિ ચ વ્રીડાવિલક્ષશ્ચિરમ્ ॥ ૫॥

સાનુમતી – પ્રિયં મે ।
કઞ્ચુકી – અસ્માત્પ્રભવતો વૈમનસ્યાદુત્સવઃ પ્રત્યાખ્યાતઃ ।
ઉભે – યુજ્યતે ।
( નેપથ્યે )
એતુ એતુ ભવાન્ ।
કઞ્ચુકી – ( કર્ણં દત્ત્વા )
અયે । ઇત એવાભિવર્તતે દેવઃ । સ્વકર્માનુષ્ઠીયતામ્ ।
ઉભે – તથા ।
(ઇતિ નિષ્ક્રાન્તે)
( તતઃ પ્રવિશતિ પશ્ચાત્તાપસદૃશવેષો રાજા વિદૂષકઃ
પ્રતીહારી ચ । )
કઞ્ચુકી – ( રાજાનમવલોક્ય )
અહો સર્વાસ્વવસ્થાસુ રમણીયત્વમાકૃતિવિશેષાણામ્ । એવમુત્સુકોઽપિ
પ્રિયદર્શનો દેવઃ । તથા હિ
પ્રત્યાદિષ્ટવિશેષમણ્ડનવિધિર્વામપ્રકોષ્ઠાર્પિતં
બિભ્રત્કાઞ્ચનમેકમેવ વલયં શ્વાસોપરક્તાધરઃ ।
ચિન્તાજાગરણપ્રતાન્તનયનસ્તેજોગુણાદાત્મનઃ
સંસ્કારોલ્લિખિતો મહામણિરિવ ક્ષીણોઽપિ નાલક્ષ્યતે ॥ ૬॥

સાનુમતી – ( રાજાનં દૃષ્ટ્વા )
સ્થાને ખલુ પ્રત્યાદેશવિમાનિતાઽપ્યસ્ય કૃતે શકુંતલા ક્લામ્યતિ ।
રાજાઃ – ( ધ્યાનમન્દં પરિક્રમ્ય )
પ્રથમં સારઙ્ગાક્ષ્યા પ્રિયયા પ્રતિબોધ્યમાનમપિ સુપ્તમ્ ।
અનુશયદુઃખાયેદં હતહૃદયં સમ્પ્રતિ વિબુદ્ધમ્ ॥ ૭॥

સાનુમતી – નન્વીદૃશાનિ તપસ્વિન્યા ભાગધેયાનિ ।

વિદૂષકઃ – ( અપવાર્ય )

લઙ્ઘિત એષ ભૂયોઽપિ શકુંતલાવ્યાધિના । ન જાને કથં

ચિકિત્સિતવ્યો ભવિષ્યતીતિ ।

કઞ્ચુકી – ( ઉપગમ્ય )

જયતુ જયતુ દેવઃ । મહારાજ પ્રત્યવેક્ષિતાઃ પ્રમદવનભૂમયઃ

યથાકામમધ્યાસ્તાં વિનોદસ્થાનાનિ મહારાજઃ ।

રાજાઃ – વેત્રવતિ મદ્વચનાદમાત્યમાર્યપિશુનં બ્રૂહિ ।

ચિરપ્રબોધાન્ન સમ્ભાવિતમસ્માભિરદ્ય ધર્માસનમધ્યાસિતુમ્ ।

યત્પ્રત્યવેક્ષિતં પૌરકાર્યમાર્યેણ તત્પત્રમારોપ્ય દીયતામિતિ ।

પ્રતીહારી – યદ્દેવ આજ્ઞાપયતિ ।

( ઇતિ નિષ્ક્રાન્તા )

રાજાઃ – વાતાયન ત્વમપિ સ્વં નિયોગમશૂન્યં કુરુ ।

કઞ્ચુકી – યદાજ્ઞાપયતિ દેવઃ ।

( ઇતિ નિષ્ક્રાન્તઃ )

વિદૂષકઃ – કૃતં ભવતા નિર્મક્ષિકમ્ । સામ્પ્રતં

શિશિરાતપચ્છેદરમણીયેઽસ્મિન્પ્રમદવનોદ્દેશ આત્માનં રમયિષ્યસિ ।

રાજાઃ – વયસ્ય યદુચ્યતે રન્ધ્રોપનિપાતિનોઽનર્થા ઇતિ તદ્વ્યભિચારિ

વચઃ । કુતઃ

મુનિસુતાપ્રણયસ્મૃતિરોધિના મમ ચ મુક્તમિદં તમસા મનઃ ।

મનસિજેન સખે પ્રહરિષ્યતા ધનુષિ ચૂતશરશ્ચ નિવેશિતઃ ॥ ૮॥

વિદૂષકઃ – તિષ્ઠ તાવત્ । અનેન દણ્ડકાષ્ઠેન કન્દર્પબાણં

નાશયિષ્યામિ ।

( ઇતિ દણ્ડકાષ્ઠમુદ્યમ્ય ચૂતાઙ્કુરં પાતયિતુમિચ્છતિ )

રાજાઃ – ( સસ્મિતમ્ )

ભવતુ । દૃષ્ટં બ્રહ્મવર્ચસમ્ । સખે ક્વોપવિષ્ટઃ પ્રિયાયાઃ

કિંચિદનુકારિણીષુ લતાસુ દૃષ્ટિં વિલોભયામિ ।

વિષૂષક – નન્વાસન્નપરિચારિકા ચતુરિકા ભવતા સંદિષ્ટા ।

માધવીમણ્ડપ ઇમાં વેલામતિવાહયિષ્યે । તત્ર મે ચિત્રફલકગતાં

સ્વહસ્તલિખિતાં તત્રભવત્યાઃ શકુંતલાયાઃ પ્રતિકૃતિમાનયેતિ ।

રાજાઃ – ઈદૃશં હૃદયવિનોદનસ્થાનમ્ । તત્તમેવ માર્ગમાદેશય

।
વિદૂષકઃ – ઇત ઇતો ભવાન્ ।
( ઉભૌ પરિક્રમતઃ । સાનુમત્યનુગચ્છતિ )
વિદૂષકઃ – એષ મણિશિલાપટ્ટકસનાથો માધવીમણ્ડપ
ઉપહારરમણીયતયા નિઃસંશયં સ્વાગતેનેવ નૌ પ્રતીચ્છતિ ।
તત્પ્રવિશ્ય નિષીદતુ ભવાન્ ।
( ઉભૌ પ્રવેશં કૃત્વોપવિષ્ટૌ )
સાનુમતી – લતાસંશ્રિતા દ્રક્ષ્યામિ તાવત્સખ્યાઃ પ્રતિકૃતમ્ ।
તતસ્તસ્યૈ ભર્તુર્બહુમુખમનુરાગં નિવેદયિષ્યામિ ।
( ઇતિ તથા કૃત્વા સ્થિતા )
રાજાઃ – સખે સર્વમિદાનીં સ્મરામિ શકુંતલાયાઃ
પ્રથમવૃત્તાન્તમ્ । કથિતવાનસ્મિ ભવતે ચ । સ
ભવાન્પ્રત્યાદેશવેલાયાં મત્સમીપગતો નાસીત્ । પૂર્વમપિ ન ત્વયા
કદાચિત્સંકીર્તિતં તત્રભવત્યા નામ । કચ્ચિદહમિવ વિસ્મૃતવાનસિ
ત્વમ્ ।
વિદૂષકઃ – ન વિસ્મરામિ । કિં તુ સર્વં કથયિત્વાવસાને પુનસ્ત્વયા
પરિહાસવિજલ્પ એષ ન ભૂતાર્થ ઇત્યાખ્યાતમ્ । મયાપિ
મૃત્પિણ્ડબુદ્ધિના તથૈવ ગૃહીતમ્ । અથવા ભવિતવ્યતા ખલુ
બલવતી ।
સાનુમતી – એવં ન્વિદમ્ ।
રાજાઃ – ( ધ્યાત્વા )
સખે ત્રાયસ્વ મામ્ ।
વિદૂષકઃ – ભોઃ કિમેતત્ । અનુપપન્નં ખલ્વીદૃશં ત્વયિ । કદાપિ
સત્પુરુષાઃ શોકવાસ્તવ્યા ન ભવન્તિ । નનુ પ્રવાતેઽપિ નિષ્કમ્પા
ગિરયઃ ।
રાજાઃ – વયસ્ય નિરાકરણવિક્લવાયાઃ પ્રિયાયાઃ સમવસ્થામનુસ્મૃત્ય
બલવદશરણોઽસ્મિ । સા હિ
ઇતઃ પ્રત્યાદેશાત્સ્વજનમનુગન્તું વ્યવસિતા
સ્થિતા તિષ્ઠેત્યુચ્ચૈર્વદતિ ગુરુશિષ્યે ગુરુસમે ।
પુનર્દૃષ્ટિં બાષ્પપ્રસરકલુષામર્પિતવતી મયિ
ક્રૂરે યત્તત્સવિષમિવ શલ્યં દહતિ મામ્ ॥ ૯॥

સાનુમતી – અહો । ઈદૃશી સ્વકાર્યપરતા । અસ્ય સંતાપેનાહં રમે ।
વિદૂષકઃ – ભોઃ અસ્તિ મે તર્કઃ કેનાપિ તત્રભવત્યાકાશચારિણા
નીતેતિ ।
રાજાઃ – કઃ પતિદેવતામન્યઃ પરામર્ષ્ટુમુત્સહેત । મેનકા કિલ
સખ્યાસ્તે જન્મપ્રતિષ્ઠેતિ શ્રુતવાનસ્મિ । તત્સહચારિણીભિઃ સખી તે
હૃતેતિ મે હૃદયમાશઙ્કતે ।
સાનુમતી – સમ્મોહઃ ખલુ વિસ્મયનીયો ન પ્રતિબોધઃ ।
વિદૂષકઃ – યદ્યેવમસ્તિ ખલુ સમાગમઃ કાલેન તત્રભવત્યા ।
રાજાઃ – કથમિવ ।
વિદૂષકઃ – ન ખલુ માતાપિતરૌ ભર્તૃવિયોગદુઃખિતાં દુહિતરં
ચિરં દ્રષ્ટું પારયતઃ ।
રાજાઃ – વયસ્ય ।
સ્વપ્નો નુ માયા નુ મતિભ્રમો નુ ક્લિષ્ટં નુ તાવત્ફલમેવ પુણ્યમ્ ।
અસન્નિવૃત્ત્યૈ તદતીતમેતે મનોરથા નામ તટપ્રપાતાઃ ॥ ૧૦॥

વિદૂષકઃ – મૈવમ્ । નન્વઙ્ગુલીયકમેવ નિદર્શનમવશ્યં
ભાવ્યચિન્તનીયઃ સમાગમો ભવતીતિ ।
રાજાઃ – ( અઙ્ગુલીયકં વિલોક્ય )
અયે ઇદં તાવદસુલભસ્થાનભ્રંશિ શોચનીયમ્ ।
તવ સુચરિતમઙ્ગુલીય નૂનં પ્રતનુ મમેવ વિભાવ્યતે ફલેન ।
અરુણનખમનોહરાસુ તસ્યાશ્ચ્યુતમસિ લબ્ધપદં યદઙ્ગુલીષુ ॥ ૧૧॥

સાનુમતી – યદ્યન્યહસ્તગતં ભવેત્સત્યમેવ શોચનીયં ભવેત્ ।
વિદૂષકઃ – ભોઃ ઇયં નામમુદ્રા કેનોધ્દાતેન તત્રભવત્યા
હસ્તાભ્યાસં પ્રાપિતા ।
સાનુમતી – મમાપિ કૌતૂહલેનાકારિત એષઃ ।
રાજાઃ – શ્રૂયતામ્ । સ્વનગરાય પ્રસ્થિતં માં પ્રિયા
સબાષ્પમાહ કિયચ્ચિરેણાર્યપુત્રઃ પ્રતિપત્તિં દાસ્યતીતિ ।
વિદૂષકઃ – તતસ્તતઃ ।
રાજાઃ – પશ્ચાદિમાં મુદ્રાં તદઙ્ગુલૌ નિવેશયતા મયા
પ્રત્યભિહિતા ।
એકૈકમત્ર દિવસે દિવસે મદીયં નામાક્ષરં ગણય ગચ્છસિ યાવદન્તમ્
।

તાવત્પ્રિયે મદવરોધગૃહપ્રવેશં નેતા જનસ્તવ સમીપમુપૈષ્યતીતિ
॥ ૧૨॥

તચ્ચ દારુણાત્મના મયા મોહાન્નાનુષ્ઠિતમ્ ।
સાનુમતી – રમણીયઃ ખલ્વવધિર્વિધિના વિસંવાદિતઃ ।
વિદૂષકઃ – અથ કથં ધીવરકલ્પિતસ્ય રોહિતમત્સ્યસ્યોદરાભ્યન્તર
આસીત્ ।
રાજાઃ – શચીતીર્થં વન્દમાનાયાઃ સખ્યાસ્તે
હસ્તાદ્ગઙ્ગાસ્રોતસિ પરિભ્રષ્ટમ્ ।
વિદૂષકઃ – યુજ્યતે ।
સાનુમતી – અત એવ તપસ્વિન્યાઃ શકુંતલાયા અધર્મભીરોરસ્ય
રાજર્ષેઃ પરિણયે સંદેહ આસીત્ ।
અથ વેદૃશોઽનુરાગોઽભિજ્ઞાનમપેક્ષતે । કથમિવૈતત્ ।
રાજાઃ – ઉપાલપ્સ્યે તાવદિદમઙ્ગુલીયકમ્ ।
વિદૂષકઃ – ( આત્મગતમ્ )
ગૃહીતોઽનેન પન્થા ઉન્મત્તાનામ્ ।
રાજાઃ – કથં નુ તં બન્ધુરકોમલાઙ્ગુલિં કરં વિહાયાસિ
નિમગ્નમમ્ભસિ । અથવા ।
અચેતનં નામ ગુણં ન લક્ષયેન્મયૈવ કસ્માદવધીરિતા પ્રિયા ॥ ૧૩॥

વિદૂષકઃ – ( આત્મગતમ્ )
કથં બુભુક્ષયા ખાદિતવ્યોઽસ્મિ ।
રાજાઃ – પ્રિયે
અકારણપરિત્યાગાનુશયતપ્તહૃદયસ્તાવદનુકમ્પ્યતામયં જનઃ
પુનર્દર્શનેન ।
( પ્રવિશ્યાપટીક્ષેપેણ ચિત્રફલકહસ્તા )
ચતુરિકા – ઇયં ચિત્રગતા ભટ્ટિની ।
( ઇતિ ચિત્રફલકં દર્શયતિ )
વિદૂષકઃ – ( વિલોક્ય )
સાધુ વયસ્ય । મધુરાવસ્થાનદર્શનીયો ભાવાનુપ્રવેશઃ । સ્ખલતીવ
મે દૃષ્ટિર્નિમ્નોન્નતપ્રદેશેષુ ।
સાનુમતી – અહો એષા રાજર્ષેર્નિપુણતા । જાને સખ્યગ્રતો મે વર્તત
ઇતિ ।

રાજાઃ –
યદ્યત્સાધુ ન ચિત્રે સ્યાત્ક્રિયતે તત્તદન્યથા ।
તથાપિ તસ્યા લાવણ્યં રેખયા કિઞ્ચિદન્વિતમ્ ॥ ૧૪॥

સાનુમતી – સદૃશમેતત્પશ્ચાત્તાપગુરોઃ સ્નેહસ્યાનવલેપસ્ય ચ ।
વિદૂષકઃ – ભોઃ ઇદાનીં તિસ્રસ્તત્રભવત્યો દૃશ્યન્તે । સર્વાશ્ચ
દર્શનીયાઃ । કતમાઽત્ર તત્રભવતી શકુંતલા ।
સાનુમતી – અનભિજ્ઞઃ ખલ્વીદૃશસ્ય રૂપસ્ય મોઘદૃષ્ટિરયં જનઃ
।
રાજાઃ – ત્વં તાવત્કતમાં તર્કયસિ ।
વિદૂષકઃ – તર્કયામિ યૈષા શિથિલબન્ધનોદ્વાન્તકુસુમેન
કેશાન્તેનોદ્ભિન્નસ્વેદબિન્દુના વદનેન વિશેષતોઽપસૃતાભ્યાં
બાહુભ્યામવસેકસ્નિગ્ધતરુણપલ્લવસ્ય ચૂતપાદપસ્ય પાર્શ્વ
ઇષત્પરિશ્રાન્તેવાલિખિતા સા શકુંતલા । ઇતરે સખ્યાવિતિ ।
રાજાઃ – નિપુણો ભવાન્ । અસ્ત્યત્ર મે ભાવચિહ્નમ્ ।
સ્વિન્નાઙ્ગુલિવિનિવેશો રેખાપ્રાન્તેષુ દૃશ્યતે મલિનઃ ।
અશ્રુ ચ કપોલપતિતં દૃશ્યમિદં વર્ણિકોચ્છ્વાસાત્ ॥ ૧૫॥

ચતુરિકે અર્ધલિખિતમેતદ્વિનોદસ્થાનમ્ । ગચ્છ । વર્તિકાં તાવદાનય
।
ચતુરિકા – આર્ય માધવ્ય અવલમ્બસ્વ ચિત્રફલકં યાવદાગચ્છામિ
।
રાજાઃ – અહમેવૈતદવલમ્બે ।
( ઇતિ યથોક્તં કરોતિ )
( નિષ્ક્રાન્તા ચેટિ )
રાજાઃ – ( નિઃશ્વસ્ય )
સાક્ષાત્પ્રિયામુપગતામપહાય પૂર્વં ચિત્રાર્પિતાં પુનરિમાં બહુ
મન્યમાનઃ ।
સ્રોતોવહાં પથિ નિકામજલામતીત્ય જાતઃ સખે
પ્રણયવાન્મૃગતૃષ્ણિકાયામ્ ॥ ૧૬॥

વિદૂષકઃ – ( આત્મગતમ્ )
એષોઽત્રભવાન્નદીમતિક્રમ્ય મૃગતૃષ્ણિકાં સઙ્ક્રાન્તઃ ।
( પ્રકાશમ્ )

ભોઃ અપરં કિમત્ર લેખિતવ્યમ્ ।
સાનુમતિ – યો યઃ પ્રદેશઃ સખ્યા મેઽભિરૂપસ્તં તમાલેખિતુકામો
ભવેત્ ।
રાજાઃ – શ્રૂયતામ્ ।
કાર્યા સૈકતલીનહંસમિથુના સ્રોતોવહા માલિની
પાદાસ્તામભિતો નિષણ્ણહરિણા ગૌરીગુરોઃ પાવનાઃ ।
શાખાલમ્બિતવલ્કલસ્ય ચ તરોર્નિર્માતુમિચ્છામ્યધઃ
શ‍ૃઙ્ગે કૃષ્ણમૃગસ્ય વામનયનં કણ્ડૂયમાનાં મૃગીમ્ ॥ ૧૭॥

વિદૂષકઃ – ( આત્મગતમ્ )
યથાહં પશ્યામિ પૂરિતવ્યમનેન ચિત્રફલકં લમ્બકૂર્ચાનાં
તાપસાનાં કદમ્બૈઃ ।
રાજાઃ – વયસ્ય અન્યચ્ચ । શકુંતલાયાઃ પ્રસાધનમભિપ્રેતમત્ર
વિસ્મૃતમસ્માભિઃ ।
વિદૂષકઃ – કિમિવ ।
સાનુમતી – વનવાસસ્ય સૌકુમાર્યસ્ય વિનયસ્ય ચ યત્સદૃશં
ભવિષ્યતિ ।
રાજાઃ –
કૃતં ન કર્ણાર્પિતબન્ધનં સખે શિરીષમાગણ્ડવિલમ્બિકેસરમ્ ।
ન વા શરચ્ચન્દ્રમરીચિકોમલં મૃણાલસૂત્રં રચિત સ્તનાન્તરે ॥
૧૮ ॥
વિદૂષકઃ – ભોઃ કિં નુ તત્રભવતી
રક્તકુવલયપલ્લવશોભિનાઽગ્રહસ્તેન મુખમાવાર્ય ચકિતચકિતેવ
સ્થિતા ।
( સાવધાનં નિરૂપ્ય દૃષ્ટ્વા )
આઃ એષ દાસ્યાઃપુત્રઃ કુસુમરસપાટચ્ચરસ્તત્રભવત્યા
વદનકમલમભિલઙ્ઘતે મધુકરઃ ।
રાજાઃ – નનુ વાર્યતામેષ ધૃષ્ટઃ ।
વિદૂષકઃ – ભવાનેવાવિનીતાનાં શાસિતાઽસ્ય વારણે
પ્રભવિષ્યતિ ।
રાજાઃ – યુજ્યતે । અયિ ભોઃ કુસુમલતાપ્રિયાતિથે કિમત્ર
પરિપતનખેદમનુભવસિ ।

એષા કુસુમનિષણ્ણા તૃષિતાપિ સતી ભવન્તમનુરક્તા
પ્રતિપાલયતિ મધુકરી ન ખલુ મધુ વિના ત્વયા પિબતિ ॥ ૧૯॥

સાનુમતી – અદ્યાભિજાતં ખલ્વેષ વારિતઃ ।
વિદૂષકઃ – પ્રતિષિદ્ધાપિ વામૈષા જાતિઃ ।
રાજાઃ – એવં ભો ન મે શાસને તિષ્ઠસિ । શ્રૂયતાં તર્હિ સમ્પ્રતિ ।
અક્લિષ્ટબાલતરુપલ્લવલોભનીયં પીતં મયા સદયમેવ રતોત્સવેષુ ।
બિમ્બાધરં સ્પૃશસિ ચેદ્ભ્રમર પ્રિયાયાસ્ત્વાં કારયામિ
કમલોદરબન્ધનસ્થમ્ ॥ ૨૦॥

વિદૂષકઃ – એવં તીક્ષ્ણદણ્ડસ્ય કિં ન ભેષ્યતિ ।
( પ્રહસ્ય । આત્મગતમ્ )
એષ તાવદુન્મત્તઃ । અહમપ્યેતસ્ય સઙ્ગેનેદૃશવર્ણ ઇવ સંવૃત્તઃ ।
( પ્રકાશમ્ )
ભોઃ ચિત્રં ખલ્વેતત્ ।
રાજાઃ – કથં ચિત્રમ્ ।
સાનુમતી – અહમપીદાનીમવગતાર્થા । કિં
પુનર્યથાલિખિતાનુભાવ્યેષઃ ।
રાજાઃ – વયસ્ય કિમિદમનુષ્ઠિતં પૌરોભાગ્યમ્ ।
દર્શનસુખમનુભવતઃ સાક્ષાદિવ તન્મયેન હૃદયેન ।
સ્મૃતિકારિણા ત્વયા મે પુનરપિ ચિત્રીકૃતા કાન્તા ॥ ૨૧॥

( ઇતિ બાષ્પં વિહરતિ )
સાનુમતી – પૂર્વાપરવિરોધ્યપૂર્વ એષ વિરહમાર્ગઃ ।
રાજાઃ – વયસ્ય કથમેવમવિશ્રાન્તદુઃખમનુભવામિ ।
પ્રજાગરાત્ખિલીભૂતસ્તસ્યાઃ સ્વપ્ને સમાગમઃ ।
બાષ્પસ્તુ ન દદાત્યેનાં દ્રષ્ટું ચિત્રગતામપિ ॥ ૨૨॥

સાનુમતી – સર્વથા પ્રમાર્જિતં ત્વયા પ્રત્યાદેશદુઃખં
શકુંતલાયાઃ ।
( પ્રવિશ્ય )
ચતુરિકા – જયતુ ભર્તા । વર્તિકાકરણ્ડકં ગૃહીત્વેતોમુખં
પ્રસ્થિતાસ્મિ ।
રાજાઃ – કિં ચ ।

ચતુરિકા – સ મે હસ્તાદન્તરા તરલિકાદ્વિતીયયા દેવ્યા
વસુમત્યાહમેવાર્યપુત્રસ્યોપનેષ્યામીતિ સબલાત્કારં ગૃહીતઃ ।
વિદૂષકઃ – દિષ્ટ્યા ત્વં મુક્તા ।
ચતુરિકા – યાવદ્દેવ્યા વિટપલગ્નમુત્તરીયં તરલિકા મોચયતિ
તાવન્મયા નિર્વાહિત આત્મા ।
રાજાઃ – વયસ્ય ઉપસ્થિતા દેવી બહુમાનગર્વિતા ચ । ભવાનિમાં
પ્રતિકૃતિં રક્ષતુ ।
વિદૂષકઃ – આત્માનમિતિ ભણ ।
( ચિત્રફલકમાદાયોત્થાય ચ )
યદિ ભવાનન્તઃપુરકૂટવાગુરાતો મોક્ષ્યતે તદા માં મેઘપ્રતિચ્છન્દે
પ્રાસાદે શબ્દાયય ।
( ઇતિ દ્રુતપદં નિષ્ક્રાન્તઃ )
સાનુમતી – અન્યસંક્રાન્તહૃદયોऽપિ પ્રથમસમ્ભાવનામપેક્ષતે ।
અતિશિથિલસૌહાર્દ ઇદાનીમેષઃ ।
( પ્રવિશ્ય પત્રહસ્તા )
પ્રતીહારી – જયતુ જયતુ દેવઃ ।
રાજાઃ – વેત્રવતિ ન ખલ્વન્તરા દૃષ્ટા ત્વયા દેવી ।
પ્રતીહારી – અથ કિમ્ । પત્રહસ્તાં માં પ્રેક્ષ્ય પ્રતિનિવૃત્તા ।
રાજાઃ – કાર્યજ્ઞા કાર્યોપરોધં મે પરિહરતિ ।
પ્રતીહારી – દેવ અમાત્યો વિજ્ઞાપયતિ ।
અર્થજાતસ્ય ગણનાબહુલતયૈકમેવ પૌરકાર્યમવેક્ષિતં તદ્દેવઃ
પત્રારૂઢં પ્રત્યક્ષીકરોત્વિતિ ।
રાજાઃ – ઇતઃ પત્રં દર્શય ।
( પ્રતિહાર્યુપનયતિ )
રાજાઃ – ( અનુવાચ્ય )
કથમ્ । સમુદ્રવ્યવહારી સાર્થવાહો ધનમિત્રો નામ નૌવ્યસને વિપન્નઃ
। અનપત્યશ્ચ કિલ તપસ્વી । રાજગામી તસ્યાર્થસંચય
ઇત્યેતદમાત્યેન લિખિતમ્ । કષ્ટં ખલ્વનપત્યતા । વેત્રવતિ
બહુધનત્વાદ્બહુપત્નીકેન તત્રભવતા ભવિતવ્યમ્ । વિચાર્યતાં યદિ
કાચિદાપન્નસત્ત્વા તસ્ય ભાર્યાસુ સ્યાત્ ।
પ્રતીહારી – દેવ ઇદાનીમેવ સાકેતકસ્ય શ્રેષ્ઠિનો દુહિતા
નિર્વૃત્તપુંસવના જાયાસ્ય શ્રૂયતે ।

રાજાઃ – નનુ ગર્ભઃ પિત્ર્યં રિક્થમર્હતિ । ગચ્છ । એવમમાત્યં
બ્રૂહિ ।
પ્રતીહારી – યદ્દેવ આજ્ઞાપયતિ ।
( ઇતિ પ્રસ્થિતા )
રાજાઃ – એહિ તાવત્ ।
પ્રતીહારી – ઇયમસ્મિ ।
રાજાઃ – કિમનેન સંતતિરસ્તિ નાસ્તીતિ ।
યેન યેન વિયુજ્યન્તે પ્રજાઃ સ્નિગ્ધેન બન્ધુના ।
સ સ પાપાદૃતે તાસાં દુષ્યન્ત ઇતિ ઘુષ્યતામ્ ॥ ૨૩॥

પ્રતીહારી – એવં નામ ઘોષયિતવ્યમ્ ।
( નિષ્ક્રમ્ય । પુનઃ પ્રવિષ્ય )
કાલે પ્રવૃષ્ટમિવાભિનન્દિતં દેવસ્ય શાસનમ્ ।
રાજાઃ – ( દીર્ઘમુષ્ણં ચ નિઃશ્વસ્ય )
એવં ભોઃ સંતતિછેદનિરવલમ્બાનાં કુલાનાં મૂલપુરુષાવસાને
સમ્પદઃ પરમુપતિષ્ઠન્તે । મમાપ્યન્તે પુરુવંશશ્રિય એષ એવ
વૃત્તાન્તઃ ।
પ્રતીહારી – પ્રતિહતમમઙ્ગલમ્ ।
રાજાઃ – ધિઙ્મામુપસ્થિતશ્રેયોવમાનિનમ્ ।
સાનુમતી – અસંશયં સખીમેવ હૃદયે કૃત્વા નિન્દિતોઽનેનાત્મા ।
રાજાઃ –
સંરોપિતેઽપ્યાત્મનિ ધર્મપત્ની ત્યક્તા મયા નામ કુલપ્રતિષ્ઠા ।
કલ્પિષ્યમાણા મહતે ફલાય વસુંધરા કાલ ઇવોપ્તબીજા ॥ ૨૪॥

સાનુમતી – અપરિચ્છિન્નેદાનીં તે સંતતિર્ભવિષ્યતિ ।
ચતુરિકા – ( જનાન્તિકમ્ )
અયે અનેન સાર્થવાહવૃત્તાન્તેન દ્વિગુણોદ્વેગો ભર્તા । એનમાશ્વાસયિતું
મેઘપ્રતિચ્છન્દાદાર્યં માધવ્યં ગૃહીત્વાગચ્છ ।
પ્રતીહારી – સુષ્ઠુ ભણસિ ।
( ઇતિ નિષ્ક્રાન્તા )
રાજાઃ – અહો દુષ્યન્તસ્ય સંશયમારૂઢાઃ પિણ્ડભાજઃ । કુતઃ ।
અસ્માત્પરં બત યથાશ્રુતિ સમ્ભૃતાનિ કો નઃ કુલે નિવપનાનિ
નિયચ્છતીતિ ।

નૂનં પ્રસૂતિવિકલેન મયા પ્રસિક્તં ધૌતાશ્રુશેષમુદકં પિતરઃ
પિબન્તિ ॥ ૨૫॥

( ઇતિ મોહમુપગતઃ )
ચતુરિકા – ( સસમ્ભ્રમમવલોક્ય )
સમાશ્વસિતુ સમાશ્વસિતુ ભર્તા ।
સાનુમતી – હા ધિક્ હા ધિક્ । સતિ ખલુ દીપે
વ્યવધાનદોષેણૈષોઽન્ધકારદોષમનુભવતિ । અહમિદાનીમેવ
નિર્વૃતં કરોમિ ।
અથ વા શ્રુતં મયા શકુંતલાં સમાશ્વાસયન્ત્યા મહેન્દ્રજનન્યા
મુખાદ્યજ્ઞભાગોત્સુકા દેવા એવ તથાનુષ્ઠાસ્યન્તિ યથાચિરેણ
ધર્મપત્નીં ભર્તાભિનન્દિષ્યતીતિ । તદ્યુક્તમેતં કાલં
પ્રતિપાલયિતુમ્ । યાવદનેન વૃત્તાન્તેન પ્રિયસખીં સમાશ્વાસયામિ ।
( ઇત્યુદ્ભ્રાન્તકેન નિષ્ક્રાન્તા )
( નેપથ્યે )
અબ્રહ્મણ્યમ્ ।
રાજાઃ – ( પ્રત્યાગતઃ । કર્ણં દત્ત્વા )
અયે માધવ્યસ્યેવાર્તસ્વરઃ । કઃ કોઽત્ર ભોઃ ।
( પ્રવિશ્ય )
પ્રતીહારી – ( સસમ્ભ્રમમ્ )
પરિત્રાયતાં દેવઃ સંશયગતં વયસ્યમ્ ।
રાજાઃ – કેનાત્તગન્ધો માણવકઃ ।
પ્રતીહારી – અદૃષ્ટરૂપેણ કેનાપિ સત્ત્વેનાતિક્રમ્ય
મેઘપ્રતિચ્છન્દસ્ય પ્રાસાદસ્યાગ્રભૂમિમારોપિતઃ ।
રાજાઃ – ( ઉત્થાય )
મા તાવત્ । મમાપિ સત્ત્વૈરભિભૂયન્તે ગૃહાઃ । અથ વા ।
અહન્યહન્યાત્મન એવ તાવજ્જ્ઞાતું પ્રમાદસ્ખલિતં ન શક્યમ્ ।
પ્રજાસુ કઃ કે પથા પ્રયાતીત્યશેષતો વેદિતુમસ્તિ શક્તિઃ ॥ ૨૬॥

( નેપથ્યે )
ભો વયસ્ય અવિહા અવિહા ।
રાજાઃ – ( ગતિભેદેન પરિક્રામન્ )
સખે ન ભેતવ્યમ્ ।

( નેપથ્યે )

( પુનસ્તદેવ પઠિત્વા )

કથં ન ભેષ્યામિ । એષ માં કોઽપિ પ્રત્યવનતશિરોધરમિક્ષુમિવ

ત્રિભઙ્ગં કરોતિ ।

રાજાઃ – ( સદૃષ્ટિક્ષેપમ્ )

ધનુસ્તાવત્ ।

( પ્રવિશ્ય શાર્ઙ્ગહસ્તા )

યવની – ભર્તઃ એતધ્દસ્તાવાપસહિતં શરાસનમ્ ।

( રાજા સશરં ધનુરાદત્તે )

( નેપથ્યે )

એષ ત્વામભિનવકણ્ઠશોણિતાર્થી શાર્દૂલઃ પશુમિવ હન્મિ

ચેષ્ટમાનમ્ ।

આર્તાનાં ભયમપનેતુમાત્તધન્વા દુષ્યન્તસ્તવ શરણં

ભવત્વિદાનીમ્ ॥ ૨૭॥

રાજાઃ – ( સરોષમ્ )

કથં મામેવોદ્દિશતિ । તિષ્ઠ કુણપાશન । ત્વમિદાનીં ન ભવિષ્યસિ ।

( શાર્ઙ્ગમારોપ્ય )

વેત્રવતિ સોપાનમાર્ગમાદેશય ।

પ્રતિહારી – ઇત ઇતો દેવઃ ।

( સર્વે સત્વરમુપસર્પન્તિ )

રાજાઃ – ( સમન્તાદ્વિલોક્ય )

શૂન્યં ખલ્વિદમ્ ।

( નેપથ્યે )

અવિહા । અવિહા । અહં અત્રભવન્તં પશ્યામિ । ત્વં માં ન પશ્યસિ ।

બિડાલગૃહીતો મૂષક ઇવ નિરાશોઽસ્મિ જીવિતે સંવૃત્તઃ ।

રાજાઃ – ભોસ્તિરસ્કરિણીગર્વિત મદીયમસ્ત્રં ત્વાં દ્રક્ષ્યતિ । એષ

તમિષું સંદધે ।

યો હનિષ્યતિ વધ્યં ત્વાં રક્ષ્યં રક્ષિષ્યતિ દ્વિજમ્ ।

હંસો હિ ક્ષીરમાદત્તે તન્મિશ્રા વર્જયત્યપઃ ॥ ૨૮॥

( ઇત્યસ્ત્રં સંધત્તે )

( તતઃ પ્રવિશતિ વિદૂષકમુત્સૃજ્ય માતલિઃ )

માતલિઃ –

કૃતા શરવ્યં હરિણા તવાસુરાઃ શરાસનં તેષુ વિકૃષ્યતામિદમ્

।

પ્રસાદસૌમ્યાનિ સતાં સુહૃજ્જને પતન્તિ ચક્ષૂંષિ ન દારુણાઃ શરાઃ

॥ ૨૯॥

રાજાઃ – ( સસમ્ભ્રમમસ્ત્રમુપસંહરન્ )

અયે માતલિઃ । સ્વાગતં મહેન્દ્રસારથે ।

( પ્રવિશ્ય )

વિદૂષકઃ – અહં યેનેષ્ટિપશુમારં મારિતઃ સોઽનેન

સ્વાગતેનાભિનદ્યતે ।

માતલિઃ – ( સસ્મિતમ્ )

આયુષ્મન્શ્રૂયતાં યદર્થમસ્મિ હરિણા ભવત્સકાશં પ્રેષિતઃ ।

રાજાઃ – અવહિતોઽસ્મિ ।

માતલિઃ – અસ્તિ કાલનેમિપ્રસૂતિર્દુર્જયો નામ દાનવગણઃ ।

રાજાઃ – અસ્તિ । શ્રુતપૂર્વં મયા નારદાત્ ।

માતલિઃ –

સખ્યુસ્તે સ કિલ શતક્રતોરજય્ય સ્તસ્ય ત્વં રણશિરસિ સ્મૃતો નિહન્તા ।

ઉચ્છેત્તું પ્રભવતિ યન્ન સપ્તસપ્તિસ્તન્નૈશં તિમિરમપાકરોતિ ચન્દ્રઃ

॥ ૩૦॥

સ ભવાનાત્તશસ્ત્ર એવ ઇદાનીમૈન્દ્રરથમારુહ્ય વિજયાય

પ્રતિષ્ઠતામ્ ।

રાજાઃ – અનુગૃહીતોઽહમનયા મઘવતઃ સમ્ભાવનયા । અથ

માધવ્યં પ્રતિ ભવતા કિમેવં પ્રયુક્તમ્ ।

માતલિઃ – તદપિ કથ્યતે । કિઞ્ચિન્નિમિત્તાદપિ

મનઃસંતાપાદાયુષ્માન્મયા વિક્લવો દૃષ્ટઃ ।

પશ્ચાત્કોપયિતુમાયુષ્મન્તં તથા કૃતવાનસ્મિ । કુતઃ ।

જ્વલતિ ચલિતેન્ધનોઽગ્નિર્વિપ્રકૃતઃ પન્નગઃ ફણાં કુરુતે ।

પ્રાયઃ સ્વં મહિમાનં ક્ષોભાત્પ્રતિપદ્યતે હિ જનઃ ॥ ૩૧॥

રાજાઃ – ( જનાન્તિકમ્ )

વયસ્ય અનતિક્રમણીયા દિવસ્પતેરાજ્ઞા । તદત્ર પરિગતાર્થં કૃત્વા

મદ્વચનાદમાત્યપિશુનં બ્રૂહિ ।

ત્વન્મતિઃ કેવલા તાવત્ પરિપાલયતુ પ્રજાઃ ।
અધિજ્યમિદમન્યસ્મિન્કર્મણિ વ્યાપૃતં ધનુઃ ॥ ૩૨॥

ઇતિ ।
વિદૂષકઃ – યદ્ભવાનાજ્ઞાપયતિ ।
( ઇતિ નિષ્ક્રાન્તઃ )
માતલિઃ – આયુષ્માન્રથમારોહતુ ।
( રાજા રથારોહણં નાટ્યતિ )
( નિષ્ક્રાન્તાઃ સર્વે )

( ઇતિ ષષ્ઠો અઙ્કઃ । )

સપ્તમોઽઙ્કઃ ।

( તતઃ પ્રવિશત્યાકાશયાનેન રથાધિરૂઢો રાજા માતલિશ્ચ )
રાજાઃ – માતલે અનુષ્ઠિતનિદેશોઽપિ મઘવતઃ
સત્ક્રિયાવિશેષાદનુપયુક્તમિવાત્માનં સમર્થયે ।
માતલિઃ – ( સસ્મિતમ્ )
આયુષ્મન્ ઉભયમપ્યપરિતોષં સમર્થયે ।
પ્રથમોપકૃતં મરુત્વતઃ પ્રતિપત્ત્યા લઘુ મન્યતે ભવાન્ ।
ગણયત્યવદાનવિસ્મિતો ભવતઃ સોઽપિ ન સત્ક્રિયાગુણાન્ ॥ ૧॥

રાજાઃ – માતલે મા મૈવમ્ । સ ખલુ
મનોરથાનામપ્યભૂમિર્વિસર્જનાવસરસત્કારઃ । મમ હિ દિવૌકસાં
સમક્ષમર્ધાસનોપવેશિતસ્ય ।
અન્તર્ગતપ્રાર્થનમન્તિકસ્થં જયન્તમુદ્વીક્ષ્ય કૃતસ્મિતેન ।
આમૃષ્ટવક્ષોહરિચન્દનાઙ્કા મન્દારમાલા હરિણા પિનદ્ધા ॥ ૨॥

માતલિઃ – કિમિવ નામાયુષ્માનમરેશ્વરાન્નાર્હતિ । પશ્ય ।
સુખપરસ્ય હરેરુભયૈઃ કૃતં ત્રિદિવમુદ્ધૃતદાનવકણ્ટકમ્ ।
તવ શરૈરધુના નતપર્વભિઃ પુરુષકેસરિણશ્ચ પુરા નખૈઃ ॥ ૩॥

રાજાઃ – અત્ર ખલુ શતક્રતોરેવ મહિમા સ્તુત્યઃ ।
સિધ્યન્તિ કર્મસુ મહત્સ્વપિ યન્નિયોજ્યાઃ ।
સમ્ભાવનાગુણમવેહિ તમીશ્વરાણામ્ ।
કિં વાઽભવિષ્યદરુણસ્તમસાં વિભેત્તા
તં ચેત્સહસ્રકિરણો ધુરિ નાકરિષ્યત્ ॥ ૪॥

માતલિઃ – સદૃશં તવૈતત્ ।
( સ્તોકમન્તરમતીત્ય )
આયુષ્મન્ ઇતઃ પશ્ય નાકપૃષ્ઠપ્રતિષ્ઠિતસ્ય સૌભાગ્યમાત્મયશસઃ
।
વિચ્છિત્તિશેષૈઃ સુરસુન્દરીણાં વર્ણૈરમી કલ્પલતાંશુકેષુ ।
વિચિન્ત્ય ગીતક્ષમમર્થજાતં દિવૌકસસ્ત્વચ્ચરિતં લિખન્તિ ॥ ૫॥

રાજાઃ – માતલે અસુરસમ્પ્રહારોત્સુકેન પૂર્વેદ્યુર્દિવમધિરોહતા મયા
ન લક્ષિતઃ સ્વર્ગમાર્ગઃ । કતમસ્મિન્મરુતાં પથિ વર્તામહે ।
માતલિઃ –
ત્રિસ્રોતસં વહતિ યો ગગનપ્રતિષ્ઠાં જ્યોતીંષિ વર્તયતિ ચ
પ્રવિભક્તરશ્મિઃ ।
તસ્ય દ્વિતીયહરિવિક્રમનિસ્તમસ્કં વાયોરિમં પરિવહસ્ય વદન્તિ માર્ગમ્
॥ ૬॥

રાજાઃ – માતલે અતઃ ખલુ સબાહ્યાન્તઃકરણો મમાન્તરાત્મા પ્રસીદતિ
।
( રથાઙ્ગમવલોક્ય )
મેઘપદવીમવતીર્ણૌ સ્વઃ ।
માતલિઃ – કથમવગમ્યતે ।
રાજાઃ – અયમરવિવરેભ્યશ્ચાતકૈર્નિષ્પતદ્ભિર્હરિભિરચિરભાસાં
તેજસા ચાનુલિપ્તૈઃ ।
ગતમુપરિ ઘનાનાં વારિગર્ભોદરાણાં
પિશુનયતિ રથસ્તે શીકરક્લિન્નનેમિઃ ॥ ૭॥

માતલિઃ – ક્ષણાદાયુષ્માન્સ્વાધિકારભૂમૌ વર્તિષ્યતે ।
રાજાઃ – ( અધોઽવલોક્ય )
માતલે વેગાવતરણાદાશ્ચર્યદર્શનઃ સંલક્ષ્યતે મનુષ્યલોકઃ । તથા
હિ ।
શૈલાનામવરોહતીવ શિખરાદુન્મજ્જતાં મેદિની ।
પર્ણાભ્યન્તરલીનતાં વિજહતિ સ્કન્ધોદયાત્પાદપાઃ ।
સંતાનૈસ્તનુભાવનષ્ટસલિલા વ્યક્તિં ભજન્ત્યાપગાઃ ।
કેનાપ્યુત્ક્ષિપતેવ પશ્ય ભુવનં મત્પાર્શ્વમાનીયતે ॥ ૮॥

માતલિઃ – સાધુ દૃષ્ટમ્ ।
( સબહુમાનમવલોક્ય )
અહો ઉદારરમણીયા પૃથિવી ।
રાજાઃ – માતલે કતમોઽયં પૂર્વાપરસમુદ્રાવગાઢઃ
કનકરસનિસ્યન્દી સાંધ્ય ઇવ મેઘપરિઘઃ સાનુમાનાલોક્યતે ।
માતલિ – આયુષ્મન્ એષ ખલુ હેમકૂટો નામ
કિમ્પુરુષપર્વતસ્તપઃસંસિદ્ધિક્ષેત્રમ્ । પશ્ય ।
સ્વાયમ્ભુવાન્મરીચેર્યઃ પ્રબભૂવ પ્રજાપતિઃ ।
સુરાસુરગુરુઃ સોઽત્ર સપત્નીકસ્તપસ્યતિ ॥ ૯॥

રાજાઃ – તેન હ્યનતિક્રમણીયાનિ શ્રેયાંસિ । પ્રદક્ષિણીકૃત્ય
ભગવન્તં ગન્તુમિચ્છામિ ।
માતલિઃ – પ્રથમઃ કલ્પઃ ।
( નાટ્યેનાવતીર્ણૌ )
રાજાઃ – ( સવિસ્મયમ્ )
ઉપોઢશબ્દા ન રથાઙ્ગનેમયઃ પ્રવર્તમાનં ન ચ દૃશ્યતે રજઃ ।
અભૂતલસ્પર્શનતયાઽનિરુદ્ધતસ્તવાવતીર્ણોઽપિ રથો ન લક્ષ્યતે ॥ ૧૦॥

માતલિઃ – એતાવાનેવ શતક્રતોરાયુષ્મતશ્ચ વિશેષઃ ।
રાજાઃ – માતલે કતમસ્મિન્પ્રદેશે મારીચાશ્રમઃ ।
માતલિઃ – ( હસ્તેન દર્શયન્ )
વલ્મીકાર્ધનિમગ્નમૂર્તિરુરસા સંદષ્ટસર્પત્વચા
કણ્ઠે જીર્ણલતાપ્રતાનવલયેનાત્યર્થસમ્પીડિતઃ ।
અંસવ્યાપિ શકુન્તનીડનિચિતં બિભ્રજ્જટામણ્ડલં
યત્ર સ્થાણુરિવાચલો મુનિરસાવભ્યર્કબિમ્બં સ્થિતઃ ॥ ૧૧॥

રાજાઃ – નમસ્તે કષ્ટતપસે ।
માતલિઃ – ( સંયતપ્રગ્રહં રથં કૃત્વા )
એતૌ અદિતિપરિવર્ધિતમન્દારવૃક્ષં પ્રજાપતેરાશ્રમં પ્રવિષ્ટૌ સ્વઃ ।
રાજાઃ – સ્વર્ગાદધિકતરં નિર્વૃતિસ્થાનમ્
અમૃતહૃદમિવાવગાઢોઽસ્મિ ।
માતલિઃ – ( રથં સ્થાપયિત્વા )
અવતરત્વાયુષ્માન્ ।

રાજાઃ – ( અવતીર્ય )
માતલે ભવાન્કથમિદાનીમ્ ।
માતલિઃ – સંયન્ત્રિતો મયા રથઃ । વયમપ્યવતરામઃ ।
( તથા કૃત્વા )
ઇત આયુષ્મન્ ।
( પરિક્રમ્ય )
દૃશ્યન્તામત્રભવતામૃષીણાં તપોવનભૂમયઃ ।
રાજાઃ – નનુ વિસ્મયાદવલોકયામિ ।
પ્રાણાનામનિલેન વૃત્તિરુચિતા સત્કલ્પવૃક્ષે વને
તોયે કાઞ્ચનપદ્મરેણુકપિશે ધર્માભિષેકક્રિયા ।
ધ્યાનં રત્નશિલાતલેષુ વિબુધસ્ત્રીસન્નિધૌ સંયમો
યત્કાઙ્ક્ષન્તિ તપોભિરન્યમુનયસ્તસ્મિંસ્તપસ્યન્ત્યમી ॥ ૧૨॥

માતલિઃ – ઉત્સર્પિણી ખલુ મહતાં પ્રાર્થના ।
( પરિક્રમ્ય । આકાશે )
અયે વૃદ્ધશાકલ્ય કિમનુતિષ્ઠતિ ભગવાન્મારીચઃ । કિં બ્રવીષિ ।
દાક્ષાયણ્યા પ્રતિવ્રતાર્ધમધિકૃત્ય પૃષ્ટસ્તસ્યૈ
મહર્ષિપત્નીસહિતાયૈ કથયતીતિ ।
રાજાઃ – ( કર્ણં દત્ત્વા )
અયે પ્રતિપાલ્યાવસરઃ ખલુ પ્રસ્તાવઃ ।
માતલિઃ – ( રાજાનમવલોક્ય )
અસ્મિન્નશોકવૃક્ષમૂલે તાવદાસ્તામાયુષ્માન્ યાવત્ત્વામિન્દ્રગુરવે
નિવેદયિતુમન્તરાન્વેષી ભવામિ ।
રાજાઃ – યથા ભવાન્મન્યતે ।
( ઇતિ સ્થિતઃ )
માતલિઃ – આયુષ્મન્ સાધયામ્યહમ્ ।
( ઇતિ નિષ્ક્રાન્તઃ )
રાજાઃ – ( નિમિત્તં સૂચયિત્વા )
મનોરથાય નાશંસે કિં બાહો સ્પન્દસે વૃથા ।
પૂર્વાવધીરિતં શ્રેયો દુઃખં હિ પરિવર્તતે ॥ ૧૩॥

( નેપથ્યે )
મા ખલુ ચાપલં કુરુ । કથં ગત એવાત્મનઃ પ્રકૃતિમ્ ।

રાજાઃ – ( કર્ણં દત્ત્વા )
અભૂમિરિયમવિનયસ્ય । કો નુ ખલ્વેષ નિષિધ્યતે ।
( શબ્દાનુસારેણાવલોક્ય । સવિસ્મયમ્ )
અયે કો નુ ખલ્વયમનુબધ્યમાનસ્તપસ્વિનીભ્યામબાલસત્ત્વો બાલઃ ।
અર્ધપીતસ્તનં માતુરામર્દક્લિષ્ટકેસરમ્ ।
પ્રક્રીડિતું સિંહશિશું બલાત્કારેણ કર્ષતિ ॥ ૧૪॥

( તતઃ પ્રવિશતિ યથાનિર્દિષ્ટકર્મા તપસ્વિનીભ્યાં બાલઃ )
બાલઃ – જૃમ્ભસ્વ સિંહ દન્તાંસ્તે ગણયિષ્યે ।
પ્રથમા – અવિનીત કિં નોઽપત્યનિર્વિશેષાણિ સત્ત્વાનિ વિપ્રકરોષિ ।
હન્ત વર્ધતે તે સંરમ્ભઃ । સ્થાને ખલુ ઋષિજનેન સર્વદમન ઇતિ
કૃતનામધેયોઽસિ ।
રાજાઃ – કિં નુ ખલુ બાલેઽસ્મિન્નૌરસ ઇવ પુત્રે સ્નિહ્યતિ મે મનઃ ।
નૂનમનપત્યતા માં વત્સલયતિ ।
દ્વિતીયા – એષા ખલુ કેસરિણી ત્વાં લઙ્ઘયતિ યદ્યસ્યાઃ પુત્રકં ન
મુઞ્ચસિ ।
બાલઃ – ( સસ્મિતમ્ )
અહો બલીયઃ ખલુ ભીતોઽસ્મિ ।
( ઇત્યધરં દર્શયતિ )
રાજાઃ –
મહતસ્તેજસો બીજં બાલોઽયં પ્રતિભાતિ મે ।
સ્ફુલિઙ્ગાવસ્થયા વહ્નિરેધાપેક્ષ ઇવ સ્થિતઃ ॥ ૧૫॥

પ્રથમા – વત્સ એનં બાલમૃગેન્દ્રં મુઞ્ચ । અપરં તે ક્રીડનકં
દાસ્યામિ ।
બાલઃ – કુત્ર । દેહ્યેતત્ ।
( ઇતિ હસ્તં પ્રસારયતિ )
રાજાઃ – કથં ચક્રવર્તિલક્ષણમપ્યનેન ધાર્યતે । તથા હ્યસ્ય ।
પ્રલોભ્યવસ્તુપ્રણયપ્રસારિતો વિભાતિ જાલગ્રથિતાઙ્ગુલિઃ કરઃ ।
અલક્ષ્યપત્રાન્તરમિદ્ધરાગયા નવોષસા ભિન્નમિવૈકપઙ્કજમ્ ॥ ૧૬॥

દ્વિતીયા – સુવ્રતે ન શક્ય એષ વાચામાત્રેણ વિરમયિતુમ્ । ગચ્છ
ત્વમ્ । મદીય ઉટજે માર્કણ્ડેયસ્યર્ષિકુમારસ્ય વર્ણચિત્રિતો
મૃત્તિકામયૂરસ્તિષ્ઠતિ । તમસ્યોપહર ।

પ્રથમા – તથા ।
( ઇતિ નિષ્ક્રાન્તા )
બાલઃ – અનેનૈવ તાવત્ક્રીડિષ્યામિ ।
( ઇતિ તાપસીં વિલોક્ય હસતિ )
રાજાઃ – સ્પૃહયામિ ખલુ દુર્લલિતાયસ્મૈ ।
આલક્ષ્યદન્તમુકુલાનનિમિત્તહાસૈરવ્યક્તવર્ણરમણીયવચઃપ્રવૃત્તીન્ ।
અઙ્કાશ્રયપ્રણયિનસ્તનયાન્વહન્તો ધન્યાસ્તદઙ્ગરજસા મલિનીભવન્તિ ॥
૧૭ ॥
તાપસી – ભવતુ । ન મામયં ગણયતિ ।
( પાર્શ્વમવલોક્ય )
કોऽત્ર ઋષિકુમારાણામ્ ।
( રાજાનમવલોક્ય )
ભદ્રમુખ એહિ તાવત્ । મોચયાનેન દુર્મોચહસ્તગ્રહેણ ડિમ્ભલીલયા
બાધ્યમાનં બાલમૃગેન્દ્રમ્ । ( -દુર્મોક- )
રાજાઃ – ( ઉપગમ્ય । સસ્મિતમ્ )
અયિ ભો મહર્ષિપુત્ર ।
એવમાશ્રમવિરુદ્ધવૃત્તિના સંયમઃ કિમિતિ જન્મતસ્ત્વયા ।
સત્ત્વસંશ્રય સુખોऽપિ દૂષ્યતે કૃષ્ણસર્પશિશુનેવ ચન્દનઃ ॥ ૧૮
॥
તાપસી – ભદ્રમુખ ન ખલ્વયમૃષિકુમારઃ ।
રાજાઃ – આકારસદૃશં ચેષ્ટિતમેવાસ્ય કથયતિ ।
સ્થાનપ્રત્યયાત્તુ વયમેવન્તર્કિણઃ ।
( યથાભ્યર્થિતમનુતિષ્ઠન્બાલસ્પર્શમુપલભ્ય । આત્મગતમ્ )
અનેન કસ્યાપિ કુલાઙ્કુરેણ સ્પૃષ્ટસ્ય ગાત્રેષુ સુખં મમૈવમ્ ।
કાં નિર્વૃતિં ચેતસિ તસ્ય કુર્યાદ્યસ્યાયમઙ્કાત્કૃતિનઃ પ્રરૂઢઃ ॥ ૧૯
॥
તાપસી – ( ઉભૌ નિર્વર્ણ્ય )
આશ્ચર્યમાશ્ચર્યમ્ ।
રાજાઃ – આર્યે કિમિવ ।
તાપસી – અસ્ય બાલકસ્ય તેऽપિ સંવાદિન્યાકૃતિરિતિ વિસ્મિતાऽસ્મિ ।
અપરિચિતસ્યાપિ તેऽપ્રતિલોમઃ સંવૃત્ત ઇતિ ।
રાજાઃ – ( બાલકમુપલાલયન્ )

ન ચેન્મુનિકુમારોઽયમથ કો સ્ય વ્યપદેશઃ ।
તાપસી – પુરુવંશઃ ।
રાજાઃ – ( આત્મગતમ્ )
કથમેકાન્વયો મમ । અતઃ ખલુ મદનુકારિણમેનમત્રભવતી મન્યતે ।
અસ્ત્યેતત્પૌરવાણામન્ત્યં કુલવ્રતમ્ ।
ભવનેષુ રસાધિકેષુ પૂર્વં ક્ષિતિરક્ષાર્થમુશન્તિ યે નિવાસમ્ ।
નિયતૈકવ્રતિયતાનિ પશ્ચાત્તરુમૂલાનિ ગૃહીભવન્તિ તેષામ્ ॥ ૨૦॥

( પ્રકાશમ્ )
ન પુનરાત્મગત્યા માનુષાણામેષ વિષયઃ ।
તાપસી – યથા ભદ્રમુખો ભણતિ । અપ્સરઃસમ્બન્ધેનાસ્ય જનન્યત્ર
દેવગુરોસ્તપોવને પ્રસૂતા ।
રાજાઃ – ( અપવાર્ય )
હન્ત દ્વિતીયમિદમાશાજનનમ્ ।
( પ્રકાશમ્ )
અથ સા તત્રભવતી કિમાખ્યસ્ય રાજર્ષેઃ પત્ની ।
તાપસી – કસ્તસ્ય ધર્મદારપરિત્યાગિનો નામ સંકીર્તયિતું
ચિન્તયિષ્યતિ ।
રાજાઃ – ( સ્વગતમ્ )
ઇયં ખલુ કથા મામેવ લક્ષ્યીકરોતિ । યદિ તાવદસ્ય શિશોર્માતરં
નામતઃ પૃચ્છામિ । અથ વાઽનાર્યઃ પરદારવ્યવહારઃ ।
( પ્રવિષ્ય મૃન્મયૂરહસ્તા )
તાપસી – સર્વદમન શકુંતલાવણ્યં પ્રેક્ષસ્વ ।
બાલઃ – ( સદૃષ્ટિક્ષેપમ્ )
કુત્ર વા મમ માતા ।
ઉભે – નામસાદૃશ્યેન વઞ્ચિતો માતૃવત્સલઃ ।
દ્વિતીયા – વત્સ અસ્ય મૃત્તિકામયૂરસ્ય રમ્યત્વં પશ્યેતિ ભણિતોઽસિ ।
રાજાઃ – ( આત્મગતમ્ )
કિં વા શકુન્તલેત્યસ્યા માતુરાખ્યા । સન્તિ પુનર્નામધેયસાદૃશ્યાનિ ।
અપિ નામ મૃગતૃષ્ણિકેવ
નામમાત્રપ્રસ્તાવો મે વિષાદાય કલ્પતે ।
બાલઃ – માતઃ રોચતે મ એષ ભદ્રમયૂરઃ ।

( ઇતિ ક્રીડનકમાદત્તે )
પ્રથમા – ( વિલોક્ય । સોદ્વેગમ્ )
અહો રક્ષાકરણ્ડકમસ્ય મણિબન્ધે ન દૃશ્યતે ।
રાજાઃ – અલમાવેગેન । નન્વિદમસ્ય સિંહશાવવિમર્દાત્પરિભ્રષ્ટમ્ ।
( ઇત્યાદાતુમિચ્છતિ )
ઉભે – મા ખલ્વેતદવલમ્બ્ય કથમ્ । ગૃહીતમનેન ।
( ઇતિ વિસ્મયાદુરોનિહિતહસ્તે પરસ્પરમવલોકયતઃ )
રાજાઃ – કિમર્થં પ્રતિષિદ્ધાઃ સ્મઃ ।
પ્રથમા – શ◌ૃણોતુ મહારાજઃ । એષાઽપરાજિતા નામૌષધિરસ્ય
જાતકર્મસમયે ભગવતા મારીચેન દત્તા । એતાં કિલ
માતાપિતરાવાત્માનં ચ વર્જયિત્વાઽપરો ભૂમિપતિતાં ન ગૃહ્ણાતિ ।
રાજાઃ – અથ ગૃહ્ણાતિ ।
પ્રથમા – તતસ્તં સર્પો ભૂત્વા દશતિ ।
રાજાઃ – ભવતીભ્યાં કદાચિદસ્યાઃ પ્રત્યક્ષીકૃતા વિક્રિયા ।
ઉભે – અનેકશઃ ।
રાજાઃ – ( સહર્ષમ્ । આત્મગતમ્ )
કથમિવ સમ્પૂર્ણમપિ મે મનોરથં નાભિનન્દામિ ।
( ઇતિ બાલં પરિષ્વજતે )
દ્વિતીયા – સુવ્રતે એહિ । ઇમં વૃત્તાન્તં નિયમવ્યાપૃતાયૈ
શકુંતલાયૈ નિવેદયાવઃ ।
( ઇતિ નિષ્ક્રાન્તે )
બાલઃ – મુઞ્ચ મામ્ । યાવન્માતુઃ સકાશં ગમિષ્યામિ ।
રાજાઃ – પુત્રક મયા સહૈવ માતરમભિનન્દિષ્યસિ ।
બાલઃ – મમ ખલુ તાતો દુષ્યન્તઃ । ન ત્વમ્ ।
રાજાઃ – ( સસ્મિતમ્ )
એષ વિવાદ એવ પ્રત્યાયયતિ ।
( તતઃ પ્રવિશત્યેકવેણીધરા શકુંતલા )
શકુંતલા – વિકારકાલેઽપિ પ્રકૃતિસ્થાં સર્વદમનસ્યૌષધિં
શ્રુત્વા ન મે આશાઽઽસીદાત્મનો ભાગધેયેષુ । અથ વા યથા
સાનુમત્યાઽઽખ્યાતં તથા સમ્ભાવ્યત એતત્ ।
રાજાઃ – ( શકુંતલાં વિલોક્ય )
અયે સેયમત્રભવતી શકુંતલા યૈષા

વસને પરિધૂસરે વસાના નિયમક્ષામમુખી ધૃતૈકવેણિઃ ।
અતિનિષ્કરુણસ્ય શુદ્ધશીલા મમ દીર્ઘં વિરહવ્રતં બિભર્તિ ॥ ૨૧॥

શકુંતલા – ( પશ્ચાત્તાપવિવર્ણં રાજાનં દૃષ્ટ્વા )
ન ખલ્વાર્યપુત્ર ઇવ । તતઃ ક એષ ઇદાનીં કૃતરક્ષામઙ્ગલં
દારકં મે ગાત્રસંસર્ગેણ દૂષયતિ ।
બાલઃ – ( માતરમુપેત્ય )
માતઃ એષ કોઽપિ પુરુષો માં પુત્ર ઇત્યાલિઙ્ગતિ ।
રાજાઃ – પ્રિયે ક્રૌર્યમપિ મે ત્વયિ પ્રયુક્તમનુકૂલપરિણામં સંવૃત્તં
યદહમિદાનીં ત્વયા પ્રત્યભિજ્ઞાતમાત્માનં પશ્યામિ ।
શકુંતલા – ( આત્મગતમ્ )
હૃદય સમાશ્વસિહિ સમાશ્વસિહિ ।
પરિત્યક્તમત્સરેણાનુકમ્પિતાસ્મિ દૈવેન । આર્યપુત્રઃ ખલ્વેષઃ ।
રાજાઃ – પ્રિયે ।
સ્મૃતિભિન્નમોહતમસો દિષ્ટ્યા પ્રમુખે સ્થિતાસિ મે સુમુખિ ।
ઉપરાગાન્તે શશિનઃ સમુપગતા રોહિણી યોગમ્ ॥ ૨૨॥

શકુંતલા – જયતુ જયત્વાર્યપુત્રઃ ।
(ઇત્યર્ધોક્તે બાષ્પકણ્ઠી વિરમતિ)
રાજાઃ – સુન્દરિ ।
બાષ્પેણ પ્રતિષિદ્ધેઽપિ જયશબ્દે જિતં મયા ।
યત્તે દૃષ્ટમસંસ્કારપાટલોષ્ઠપુટં મુખમ્ ॥ ૨૩॥

બાલઃ – માતઃ ક એષઃ ।
શકુંતલા – વત્સ તે ભાગધેયાનિ પૃચ્છ ।
રાજાઃ – ( શકુંતલાયાઃ પાદયોઃ પ્રણિપત્ય )
સુતનુ હૃદયાત્પ્રત્યાદેશવ્યલીકમપૈતુ તે
કિમપિ મનસઃ સમ્મોહો મે તદા બલવાનભૂત્ ।
પ્રબલતમસામેવમ્પ્રાયાઃ શુભેષુ હિ વૃત્તયઃ
સ્રજમપિ શિરસ્યન્ધઃ ક્ષિપ્તાં ધુનોત્યહિશઙ્કયા ॥ ૨૪॥

શકુંતલા – ઉત્તિષ્ઠત્વાર્યપુત્રઃ । નૂનં મે સુચરિતપ્રતિબન્ધકં
પુરાકૃતં તેષુ દિવસેષુ પરિણામાભિમુખમાસીદ્યેન
સાનુક્રોશોઽપ્યાર્યપુત્રો મયિ વિરસઃ સંવૃત્તઃ ।

( રાજોત્તિષ્ઠતિ )

શકુંતલા – અથ કથમાર્યપુત્રેણ સ્મૃતો દુઃખભાગ્યયં જનઃ ।

રાજાઃ – ઉદ્ધૃતવિષાદશલ્યઃ કથયિષ્યામિ ।

મોહાન્મયા સુતનુ પૂર્વમુપેક્ષિતસ્તે

યો બદ્ધબિન્દુરધરં પરિબાધમાનઃ ।

તં તાવદાકુટિલપક્ષ્મવિલગ્નમદ્ય

બાષ્પં પ્રમૃજ્ય વિગતાનુશયો ભવેયમ્ ॥ ૨૫॥

( ઇતિ યથોક્તમનુતિષ્ઠતિ )

શકુંતલા – ( નામમુદ્રાં દૃષ્ટ્વા )

આર્યપુત્ર ઇદં તદઙ્ગુલીયકમ્ ।

રાજાઃ – અસ્માદઙ્ગુલીયોપલમ્ભાત્ખલુ સ્મૃતિરુપલબ્ધા ।

શકુંતલા – વિષમં કૃતમનેન યત્તદાઽઽર્યપુત્રસ્ય પ્રત્યયકાલે

દુર્લભમાસીત્ ।

રાજાઃ – તેન હિ ઋતુસમવાયચિહ્નં પ્રતિપદ્યતાં લતા કુસુમમ્ ।

શકુંતલા – નાસ્ય વિશ્વસિમિ । આર્યપુત્ર એવૈતદ્ધારયતુ ।

( તતઃ પ્રવિશતિ માતલિઃ )

માતલિઃ – દિષ્ટ્યા ધર્મપત્નીસમાગમેન પુત્રમુખદર્શનેન

ચાયુષ્માન્વર્ધતે ।

રાજાઃ – અભૂત્સમ્પાદિતસ્વાદુફલો મે મનોરથઃ । માતલે ન ખલુ

વિદિતોઽયમાખણ્ડલેન વૃત્તાન્તઃ સ્યાત્ ।

માતલિઃ – ( સસ્મિતમ્ )

કિમીશ્વરાણાં પરોક્ષમ્ । એત્વાયુષ્માન્ । ભગવાન્મારીચસ્તે દર્શનં

વિતરતિ ।

રાજાઃ – શકુન્તલે અવલમ્બ્યતાં પુત્રઃ । ત્વાં પુરસ્કૃત્ય ભગવન્તં

દ્રષ્ટુમિચ્છામિ ।

શકુંતલા – જિહ્રેમ્યાર્યપુત્રેણ સહ ગુરુસમીપં ગન્તુમ્ ।

રાજાઃ – અપ્યાચરિતવ્યમભ્યુદયકાલેષુ । એહ્યેહિ ।

( સર્વે પરિક્રામન્તિ )

( તતઃ પ્રવિશત્યદિત્યા સાર્ધમાસનસ્થો મારીચઃ )

મારીચઃ – ( રાજાનમવલોક્ય )

દાક્ષાયણિ ।

પુત્રસ્ય તે રણશિરસ્યયમગ્રયાયી
દુષ્યન્ત ઇત્યભિહિતો ભુવનસ્ય ભર્તા ।
ચાપેન યસ્ય વિનિવર્તિતકર્મ જાતં
તત્કોટિમત્કુલિશમાભરણં મઘોનઃ ॥ ૨૬॥

અદિતિઃ – સમ્ભાવનીયાનુભાવાઽસ્યાકૃતિઃ ।
માતલિઃ – આયુષ્મન્ એતૌ પુત્રપ્રીતિપિશુનેન ચક્ષુષા દિવૌકસાં
પિતરાવાયુષ્મન્તમવલોકયતઃ । તાવુપસર્પ ।
રાજાઃ – માતલે ।
પ્રાહુર્દ્વાદશધા સ્થિતસ્ય મુનયો યત્તેજસઃ કારણં
ભર્તારં ભુવનત્રયસ્ય સુષુવે યદ્યજ્ઞભાગેશ્વરમ્ ।
યસ્મિન્નાત્મભવઃ પરોઽપિ પુરુષશ્ચક્રે ભવાયાસ્પદં
દ્વન્દ્વં દક્ષમરીચિસમ્ભવમિદં તત્સ્રષ્ટુરેકાન્તરમ્ ॥ ૨૭॥

માતલિઃ – અથ કિમ્ ।
રાજાઃ – ( ઉપગમ્ય )
ઉભાભ્યામપિ વાસવનિયોજ્યો દુષ્યન્તઃ પ્રણમતિ ।
મારીચ – વત્સ ચિરં જીવ । પૃથિવીં પાલય ।
અદિતિઃ – વત્સ અપ્રતિરથો ભવ ।
શકુંતલા – દારકસહિતા વાં પાદવદનં કરોમિ ।
મારીચઃ – વત્સે ।
આખણ્ડલસમો ભર્તા જયન્તપ્રતિમઃ સુતઃ ।
આશીરન્યા ન તે યોગ્યા પૌલોમીસદૃશી ભવ ॥ ૨૮॥

અદિતિઃ – જાતે ભર્તુર્બહુમતા ભવ । અયં ચ દીર્ઘાયુર્વત્સક
ઉભયકુલનન્દનો ભવતુ । ઉપવિશત ।
( સર્વે પ્રજાપતિમભિત ઉપવિશન્તિ )
મારીચઃ – ( એકૈકં નિર્દિશન્ )
દિષ્ટ્યા શકુંતલા સાધ્વી સદપત્યમિદં ભવાન્ ।
શ્રદ્ધા વિત્તં વિધિશ્ચેતિ ત્રિતયં તત્સમાગતમ્ ॥ ૨૯॥

રાજાઃ – ભગવન્ । પ્રાગભિપ્રેતસિદ્ધિઃ । પશ્ચાદ્દર્શનમ્ ।
અતોઽપૂર્વઃ ખલુ વોઽનુગ્રહઃ । કુતઃ ।
ઉદેતિ પૂર્વં કુસુમં તતઃ ફલં ઘનોદયઃ પ્રાક્તદનન્તરં પયઃ ।

નિમિત્તનૈમિત્તિકયોરયં ક્રમસ્તવ પ્રસાદસ્ય પુરસ્તુ સમ્પદઃ ॥ ૩૦॥

માતલિઃ – એવં વિધાતારઃ પ્રસીદન્તિ ।
રાજાઃ – ભગવન્ ઇમામાજ્ઞાકરીં વો ગાન્ધર્વેણ વિવાહવિધિનોપયમ્ય
કસ્યચિત્કાલસ્ય બન્ધુભિરાનીતાં
સ્મૃતિશૈથિલ્યાત્પ્રત્યાદિશન્નપરાદ્ધોઽસ્મિ તત્રભવતો
યુષ્મત્સગોત્રસ્ય કણ્વસ્ય । પશ્ચાદઙ્ગુલીયકદર્શનાદૂઢપૂર્વાં
તદ્દુહિતરમવગતોઽહમ્ । તચ્ચિત્રમિવ મે પ્રતિભાતિ ।
યથા ગજો નેતિ સમક્ષરૂપે તસ્મિન્નપક્રામતિ સંશયઃ સ્યાત્ ।
પદાનિ દૃષ્ટ્વા તુ ભવેત્પ્રતીતિસ્તથાવિધો મે મનસો વિકારઃ ॥ ૩૧॥

મારીચઃ – વત્સ અલમાત્માપરાધશઙ્કયા । સમ્મોહોઽપિ
ત્વય્યનુપપન્નઃ । શ્રૂયતામ્ ।
રાજાઃ – અવહિતોઽસ્મિ ।
મારીચઃ – યદૈવાપ્સરસ્તીર્થાવતરણાત્પ્રત્યક્ષવૈક્લવ્યાં
શકુંતલામાદાય મેનકા દાક્ષાયણીમુપગતા તદૈવ
ધ્યાનાદવગતોઽસ્મિ દુર્વાસસઃ શાપાદિયં તપસ્વિની
સહધર્મચારિણીત્વયા પ્રત્યાદિષ્ટા નાન્યથેતિ । સ
ચાયમઙ્ગુલીયકદર્શનાવસાનઃ ।
રાજાઃ – ( સોચ્છ્વાસમ્ )
એષ વચનીયાન્મુક્તોઽસ્મિ ।
શકુંતલા – ( સ્વગતમ્ )
દિષ્ટ્યાઽકારણપ્રત્યાદેશી નાર્યપુત્રઃ । ન પુનઃ શપ્તમાત્માનં
સ્મરામિ । અથ વા પ્રાપ્તો મયા સ હિ શાપો વિરહશૂન્યહૃદયયા ન
વિદિતઃ । અતઃ સખીભ્યાં સંદિષ્ટાસ્મિ ભર્તુરઙ્ગુલીયકં
દર્શયિતવ્યમિતિ ।
મારીચઃ – વત્સે ચરિતાર્થાસિ । તદિદાનીં સહધર્મચારિણં પ્રતિ
ન ત્વયા મન્યુઃ કાર્યઃ । પશ્ય ।
શાપાદસિ પ્રતિહતા સ્મૃતિરોધરૂક્ષે
ભર્તર્યપેતતમસિ પ્રભુતા તવૈવ ।
છાયા ન મૂર્છતિ મલોપહતપ્રસાદે
શુદ્ધે તુ દર્પણતલે સુલભાવકાશા ॥ ૩૨॥

રાજાઃ – યથાહ ભગવાન્ ।

મારીચઃ – વત્સ કચ્ચિદભિનન્દિતસ્ત્વયા
વિધિવદસ્માભિરનુષ્ઠિતજાતકર્મા પુત્ર એષ શાકુન્તલેયઃ ।
રાજાઃ – ભગવન્ અત્ર ખલુ મે વંશપ્રતિષ્ઠા ।
( ઇતિ બાલં હસ્તેન ગૃહ્ણાતિ )
મારીચઃ – તથાભાવિનમેનં ચક્રવર્તિનમવગચ્છતુ ભવાન્ ।
પશ્ય ।
રથેનાનુદ્ઘાતસ્તિમિતગતિના તીર્ણજલધિઃ
પુરા સપ્તદ્વીપાં જયતિ વસુધામપ્રતિરથઃ ।
ઇહાયં સત્ત્વાનાં પ્રસભદમનાત્સર્વદમનઃ
પુનર્યાસ્યત્યાખ્યાં ભરત ઇતિ લોકસ્ય ભરણાત્ ॥ ૩૩ ॥

રાજાઃ – ભગવતા કૃતસંસ્કારે સર્વમસ્મિન્વયમાશાસ્મહે ।
અદિતિઃ – ભગવન્ અસ્યા દુહિતૃમનોરથસમ્પત્તેઃ કણ્વોઽપિ
તાવચ્છ્રુતવિસ્તારઃ ક્રિયતામ્ । દુહિતૃવત્સલા મેનકેહૈવોપચરન્તી
તિષ્ઠતિ ।
શકુંતલા – ( આત્મગતમ્ )
મનોરથઃ ખલુ મે ભણિતો ભગવત્યા ।
મારીચઃ – તપઃપ્રભવાત્પ્રત્યક્ષં સર્વમેવ તત્રભવતઃ ।
રાજાઃ – અતઃ ખલુ મમ નાતિક્રુદ્ધો મુનિઃ ।
મારીચઃ – તથાપ્યસૌ પ્રિયમસ્માભિઃ પ્રષ્ટવ્યઃ । કઃ કોઽત્ર ભોઃ ।
( પ્રવિશ્ય )
શિષ્યઃ – ભગવન્ અયમસ્મિ ।
મારીચઃ – ગાલવ ઇદાનીમેવ વિહાયસા ગત્વા મમ
વચનાત્તત્રભવતે કણ્વાય પ્રિયમાવેદય યથા પુત્રવતી શકુંતલા
તચ્છાપનિવૃત્તૌ સ્મૃતિમતા દુષ્યન્તેન પ્રતિગૃહીતેતિ ।
શિષ્યઃ – યદાજ્ઞાપયતિ ભગવાન્ ।
( ઇતિ નિષ્ક્રાન્તઃ )
મારીચઃ – વત્સ ત્વમપિ સ્વાપત્યદારસહિતઃ સખ્યુરાખણ્ડલસ્ય
રથમારુહ્ય તે રાજધાનીં પ્રતિષ્ઠસ્વ ।
રાજાઃ – યદાજ્ઞાપયતિ ભગવાન્ ।
મારીચઃ – અપિ ચ ।
તવ ભવતુ બિડૌજાઃ પ્રાજ્યવૃષ્ટિઃ પ્રજાસુ

ત્વમપિ વિતતયજ્ઞો વજ્રિણં પ્રીણયસ્વ ।
યુગશતપરિવર્તાનેવમન્યોન્યકૃત્યૈર્નયતમુ-
ભયલોકાનુગ્રહશ્લાઘનીયૈઃ ॥ ૩૪॥

રાજાઃ – ભગવન્ યથાશક્તિ શ્રેયસે યતિષ્યે ।
મારીચઃ – વત્સ કિં તે ભૂયઃ પ્રિયમુપકરોમિ ।
રાજાઃ – અતઃ પરમપિ પ્રિયમસ્તિ । યદીહ ભગવાન્પ્રિયં કર્તુમિચ્છતિ
તર્હીદમસ્તુ ।
( ભરતવાક્યમ્ )
પ્રવર્તતાં પ્રકૃતિહિતાય પાર્થિવઃ
સરસ્વતી શ્રુતમહતાં મહીયતામ્ ।
મમાપિ ચ ક્ષપયતુ નીલલોહિતઃ
પુનર્ભવં પરિગતશક્તિરાત્મભૂઃ ॥ ૩૫॥

( નિષ્ક્રાન્તાઃ સર્વે )

( ઇતિ સપ્તમોઽઙ્કઃ । )

સમાપ્તમિદમભિજ્ઞાનશકુંતલં નામ નાટકમ્ ।

---

The AbhijnAnazAkuntalam of KAlidAsa
ed. by M.R. Kale
Bombay 1898 (ninth ed. 1961)

Input by Muneo Tokunaga
Input finished on July 26N 1999.
From Kyoto University's Sanskrit ftp archives at
ftp://ccftp.kyoto-su.ac.jp/pub/doc/sanskrit/

Proofread by Shrirang Nene snene at lds.com

*The AbhijnAnashAkuntalam of KAlidAsa*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*